Digitized by Arya Samaj Foundation Chennai and eGangotri

228
१८०

228
१८०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री भवानीप्रसाद जी
हलवौर (बिजनौर) निवासी द्वारा पुस्तकालय गुरुकुल
काँगड़ी विश्वविद्यालय को सवादोहजार पुस्तकें सप्रेम भेंट।

पुस्तकालय, गुरुकुल काँगड़ी विश्वविद्यालय

पुस्तक संख्या 226/पु०

पंजिका संख्या 33,152

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कोई सज्जन पन्द्रह दिन से अधिक समय तक पुस्तक अपने पास नहीं रख सकते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CHECKED 1973
Initial

COMPUTER
224.190
33162

अहते शानाच जुकी।
पुस्तक सं० ...
आगत सं० ...
तिथि ...
गुरुकुल पुस्तकालय

पुस्तकालय
गुरुकुल कांगड़ी

३३,१८२

* अथ श्रावणीप्रयोगप्रारम्भः । *

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar





Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगणेशाय नमः ॥ ॥ अथ श्रावणीप्रयोगः ॥ ॥ कृष्णमूर्तिपदद्वंद्वं निधाय हृदि मंगलम् ॥ स्फुटं स्नानप्रयोगोयं यथामति वितन्यते ॥ १ ॥ तत्रोत्सर्गकालो निर्णीयते ॥ अत्र गृह्यसूत्रम् ॥ पौषस्य रोहिण्यां मध्यमाया वाष्टकायामध्यायानुत्सृजेयुरुदकांतं गत्वा ॥ इति । सूत्रार्थश्च । पौषमासस्य रोहिणीनक्षत्रयुक्ते ॥ अथ मध्यमाष्टकायां पौष्यूर्ध्वाष्टम्यामध्यायानुत्सृजेयुराचार्याशिष्या उत्सृष्टानां छंदसां पुनरुपाकरणं यावत्तावन्नपठेयुरित्यर्थः । इति । अत्रकालांतरमप्युक्तंगृह्यकारेण ॥ तथाचसूत्रम् ॥ अर्धषष्ठान्मासानधीत्योत्सृजेयुरर्धसप्तमान्वा ॥ इति सूत्रार्थः । अर्धषष्ठमासाद् अर्धःषष्ठोमासोयेषुतेऽर्धषष्ठास्तान् ॥ सार्धपञ्चमानिति यावत् ॥ श्रावण्यामुपाकृतानिच्छंदांसिमाघकृष्णामावास्यापर्यंतमधीत्योत्सृजेयुः । अर्धसप्तमान्वाअर्धः सप्तमोमासोयेषुतेऽर्धसप्तमास्तानर्धसप्तमान्सार्धषण्मासानिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावत् । फाल्गुनकृष्णामावास्यापर्यंतमधीत्योत्सृजेयुरित्यर्थः । तथाचसूत्रार्थ
कारिका । पौषमासस्यरोहिण्यांकृष्णाष्टम्यामथापिवा ॥ उदकान्तंसमासाद्य वेदस्यो
त्सर्जनंबहिः॥इति । दर्शान्ताभिप्रायेण पौष कृष्णाष्टम्याम् । पौर्णमास्यन्ताभिप्रायेण
माघकृष्णाष्टम्यामित्यर्थः ॥ वेदस्येति ॥ वेदशब्देन मंत्रब्राह्मणयोरेवोत्सर्गः । नाङ्गा
नाम् । छन्दोवत्सूत्राणीत्यादिना भेदावगमात् ॥ अत्र सूत्रोक्तकाले उत्सर्गाख्यं कर्म
कर्तुमशक्तश्चेत्स्मृत्युक्तकालेऽपिकुर्वीत । तत्रमनुः । पुष्येतु छन्दसां कुर्याद्बहि
रुत्सर्जनं द्विजः ॥ माघशुक्लस्यवाप्राप्ते पूर्वाण्हेप्रथमेऽहनि ॥ कात्यायनः ॥ उत्सर्ग
श्चतदातिष्येकुर्यात्प्रौष्ठपदेऽथवा ॥ तथा खादिरगृह्ये विशेषः ॥ पुष्येतूत्सर्जनं कु-
र्यादुपाकर्मदिनेऽथवा ॥ इति ॥ पुष्ये पुष्यमासे इतिमदनरत्नकारेण व्याख्यातम् ।
उपाकर्मकालस्तु सूत्रकारेणोक्तः ॥ अथातोऽध्यायोपाकर्मौषधीनां प्रादुर्भावे श्रव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णेन श्रावण्यां पौर्णमास्यांश्रावणस्य पञ्चमींहस्तेनवा ॥ इति ॥ सूत्राथश्चप्रयोगे स्फुटीभविष्यति ॥ क्वचिन्निषेधोऽप्युक्तः । संक्रांतौग्रहणे चैव सूतके मृतकेऽपिवा ॥ गणस्नानं नकुर्वीत नारदस्य वचोयथा ॥ गणस्नानशब्देनोत्सर्गाख्यंकर्म ॥ अतएव स्मृत्यर्थसारे उक्तम् ॥ कस्मिंश्चिद्दिनेग्रहणसंक्रान्तिवर्जिते कार्यं कर्मणोनलोपः नोत्कर्षइति । इत्थमुत्सर्गकालं निर्णीय यथाविधिप्रयोगंकुर्वीत ॥ स्नातव्यंविधिवत्तत्रेत्युक्तत्वाद्यथाविधिस्नानप्रयोगोनिरूप्यते ॥ ॥ तत्रायंप्रकारः॥ अयंनित्यस्नानस्य कालापकर्षणविधिः नतुकर्माङ्गत्वेन विधानम् ॥ ततश्चतस्मिन्दिने प्रातरान्हिकं माध्यान्हिकंस्नानं प्रातरेव कर्तव्यम् । नमध्यान्हे दैवकर्मत्वात् ॥ प्रथमंसाशिष्य आचार्यः प्रथमप्रयोगे गणपतिपूजनपूर्वकं मातृकार्चनमाभ्युदयिकश्राद्धं यथोक्तं कुर्वीत ॥॥ श्राद्धं गुरोरेव ॥ तथाचरेणुकदीक्षितः । पौषमासस्य रोहिण्यां कृष्णा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्टम्यामथापिवा ॥ माघस्याद्यतिथौतत्रपूर्वाह्णेफाल्गुनस्यवा ॥ उत्सर्गंविधिवत्कुर्या
ज्जलान्तेछन्दसांबहिः ॥ नागानांमातृपूजादिश्राद्धंकृत्वागुरोः सह ॥ इति ॥ शुद्धेवास-
सीपरिधायकृतकुशोपग्रहः कृतप्राणायामोदक्षिणपाणिनागृहितकुसुमयवकुङ्कुमो
देशकालौसंकीर्त्यसंकल्पंकुर्यात् ॥ ॥तद्यथा ॥ ॥ अधीतानामध्यापितानांचाध्या
यानांस्थापनविच्छेदक्रोशघोषणदन्तविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णा
नांगलोपलम्बितविवृत्तोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां
श्रुतीनां यद्यातयामत्वं तत्परिहारार्थम् अष्टत्रिंशदनध्यायाध्ययनेरथ्यासंचर
तः शूद्रस्यशृण्वतोऽध्ययने म्लेच्छान्त्यजादेःशृण्वतोऽध्ययने अशुचिदेशेऽध्य
यने आत्मनोऽशुचित्वेऽध्ययने अक्षरस्वरानुस्वारपदच्छेदकाण्डिकाव्यञ्जनोरस्य
कण्ठ्यतालव्यमूर्धन्यदन्त्यौष्ठ्यनासिक्य कण्ठ्यनासिक्य तालव्यनासिक्य मूर्धन्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नासिक्य दन्त्यनासिक्यौष्ठ्यनासिक्य कण्ठ्यतालव्य कण्ठ्यौष्ठदन्त्यौष्ठ्यरेफजिह्वा
मूलीयोपध्मानीयोदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतचर्द्विर्भावपरसवर्णादीनां व्य
त्ययेनोच्चारेमाधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्यवेदस्यस
वीर्यत्वसंपादनद्वारायथावत्फलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थं साशिष्योऽहमुत्सर्जनाख्यं
कर्मकरिष्ये ॥ तदङ्गत्वेनगणपतिपूजनमातृकापूजनाभ्युदयिकश्राद्धानिकरिष्ये
॥ तत्सर्वंगणपत्यादिपूजनंयथोक्तविधिनासंपादयेत् ॥ ततःस्नानतर्पणपूजोपकरणा
निमृदमार्द्रगोमयंभस्मकुशांस्तिलाक्षतान्सुरभीणिपुष्पाणि दूर्वाङ्कुरापामार्गयज्ञो
पवीतगन्धधूपदीपदाक्षिणानैवेद्यफलताम्बूल नारिकेलपूगीफल पञ्चामृतपञ्चगव्यपी
तश्वेतवस्त्रकुङ्कुमहरिद्रारक्तचूर्णानिसमित्सक्तुघृतदर्वीतर्पणपात्रादीनिगृहीत्वा ग्रामा
त्प्राग्वोदग्वादिशिशिष्यैरन्यैश्चब्राह्मणैःसहनद्यादिरम्यंजलाशयंप्रतिगच्छेत् ॥ देव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खातालाभेचतुरःपिण्डानुद्धृत्यपारक्येऽपिजलाशयेस्नानमाचरेदित्यपिबोद्धव्यम् ॥ ततस्तीरंप्रक्षाल्यशुभामृदमार्द्रगोमयंकुशांस्तिलानक्षतान्सुरभीणिपुष्पाणिदुर्वापामार्गमृषिस्थापनार्थंपीठमृषिपूजनार्थंगंधधूपघृतदीपनानाविधनैवेद्यवर्षोद्भवफल पूगीफलयज्ञोपवीतानिपृथक्पृथक्स्थापयेत् ॥ अथसर्वैःसहस्मार्ताचमनंकुर्यात् ॥ तद्यथा ॥ सामान्यमृदापाणिपादानुलेपनम् ॥ ततःप्रक्षालितपाणिपादःसपवित्रकरोबद्धत्रिकच्छाशिखोधृतवामस्कंधब्रह्मसूत्रस्ततःस्थलेचैकैकं पादंकृत्वोपविश्यबाहूजान्वंतराकृत्वामुक्तांगुष्ठकनिष्ठिकेनदक्षिणहस्तेन फेनबुद्बुदवर्जंस्वच्छंमाषमज्जनपरिमितं जलमादायांगुष्ठमूलस्थब्राह्मेणतीर्थेनशब्दमकुर्वंस्त्रिःप्रपिबेत् ॥ ततोऽगुष्ठमूलेनमुखंद्विःप्रमृज्यांगुष्ठमूलंप्रक्षाल्यखानिसंस्पृशेत् ॥ तद्यथा ॥ तर्जनीमध्यमानामिकाभिरास्यम्। अंगुष्ठतर्जनीभ्यांनासारंध्रद्वयम्। अनामिकांगुष्ठाभ्यांचक्षुषी। ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्यामेवश्रोत्रे । अंगुष्ठकनिष्ठिकाभ्यांनाभिम् । पाणितलेनहृदयम् । संकुचितकराग्रेण स्कंधद्वयम् । एवमेवशीर्षम् ॥ एवंस्मार्ताचमनंविधायप्राणायामंकृत्वाहेमाद्रिसंकल्पं कुर्वीत ॥ देशकालौसंकीर्त्य ॥ उत्सर्गाख्येकर्मणिस्नानविधिनास्नानंकुर्वे ॥ अत्रप्रणव पूर्वकामंत्राःपठनीयाः ॥ तदुक्तंदाल्भ्यपरिशिष्टे । ब्रह्मयज्ञोजपोहोमोदेवर्षिपितृक कर्मच ॥ अनोंकृत्यकृतंसर्वंनभवेत्सिद्धिकारकम् ॥ ॥ इति ॥ ततोगुरुःशिष्यैःसह उभाकवीत्युच्चैःपठेत ॥ ॐउभाकवीयुवायोधर्मःपरापतत् ॥ परिसख्यस्यधर्मि णोविसख्यानिविसृजामहे ॥ इतिमंत्रंपठित्वायथाज्येष्ठक्रमेणसर्वेगुरोरभिवादनं कुर्युः । पुनश्चदेशकालौसंकीर्त्यसंकल्पंकुर्वीत ॥ यथा ॥ अध्यायोत्सर्गोपाकर्मानि मित्तंगणस्नानमहंकरिष्ये ॥ इतिसंकल्प्यस्नानानुज्ञांप्रार्थयेत् ॥ नमोस्तु वासुदे वायशितिकंठायवेधसे ॥ रुद्रायचापहस्तायदंडिनेचक्रिणेनमः ॥ सरस्वतीचगाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रीवेदमातागरीयसी ॥ सन्निधात्रीभवत्वंचसर्वपापप्रणाशिनी ॥ त्वंराजासर्वतीर्था
नांत्वमेवजगतःपिता ॥ याचितंतीर्थमेदेहिसर्वपापप्रणाशनः ॥ यद्वासागरनिर्घोषद
ण्डहस्तासुरांतक ॥ जगत्स्रष्टर्जगन्मित्रनमामित्वांसुरांतक ॥ तीक्ष्णदंष्ट्रमहाकायक
ल्पांतदहनोपम ॥ भैरवायनमस्तुभ्यमननुज्ञांदातुमर्हसि ॥ आपस्त्वमसिदेवेशज्यो
तिषांपतिरेवच ॥ पापंनाशयमेदेववाङ्मनः कायकर्मजम् ॥ इतिस्नानानुज्ञांप्रार्थ्यज
लाभिमंत्रणंकुर्यात् ॥ तद्यथा ॥ उरुहीत्यस्यशुनःशेपऋषिर्वरुणोदेवतात्रिष्टु
प्छंदः जलाभिमंत्रणेविनियोगः ॥ ॐउरुहिराजाव्वरुणश्चकार सूर्यायपंथाम-
न्वेतवाउ ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् ॥ न-
मोवरुणायाभिष्ठितोवरुणस्यपाशः ॥ इतिमंत्रेणतोयमभिमंत्रयेत् ॥ अ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

थजलावर्तनम्॥ येतेशतमितिमंत्रस्यवामदेवऋषिर्वरुणसवितृविष्णुविश्वमरुत्स्वर्का
देवताःत्रिष्टुप्छंदःतोयावर्तनेविनियोगः ॥ ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावि
ततामहांतः ॥ तेभिर्नोअद्यसवितोत्तविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः॥ इतिमंत्रेणजलं
दक्षिणहस्तेनात्रिवारंदक्षिणावर्तमालोडयेत् ॥ ततःसुमित्रियेत्यनेनपूर्वांजलिनापोगृ
हीत्वादुर्मित्रियेत्यनेनयस्यांदिशिद्वेष्टास्तितस्यांदिशिद्वेष्टारंमनसाविचिंत्य तटेंऽज
लिंप्रक्षिपेत् ॥ द्वेष्टुरभावेकामादीन्स्मृत्वांजलिंप्रक्षिपेत् ॥ सुमित्रियानइतिमंत्रस्यप्र
जापतिर्ऋषिरापोदेवतायजुश्छंदःजलग्रहणेविनियोगः ॥ ॐ सुमित्रियानआपऽओ
षधयःसंतु ॥ दुर्मित्रियानइत्यस्यप्रजापतिर्ऋषिरापोदेवतायजुश्छंदःअंजलिप्रक्षेपे
विनियोगः ॥ ॐ दुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मः ॥ अभिचार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केऽपःस्पृशेत् ॥ अथमृत्तिकास्नानम् ॥ तस्यास्त्रीन्भागान्कृत्वाप्रथमभागंवामह
स्तेनगृहीत्वातेननाभेरधउभयकटिप्रदेशावनुलेपयेत् ॥ हस्तंप्रक्षाल्यपुनस्तेनैवह
स्तेनाद्वितीयभागेनमृत्तिकांवामहस्तेनगृहीत्वादक्षिणहस्तेनाच्छाद्याभिमंत्रयेत् ॥
तत्रमंत्रः ॥ ॐ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ॥ उद्धृतासिवराहेणकृष्णेनश
तबाहुना ॥ मृत्तिकेब्रह्मपूतासिकश्यपनाभिवंदिता ॥ मृत्तिकेहरमेपापंयन्मयादु
ष्कृतंकृतम् ॥ त्वयाहतेनपापेनसर्वपापैःप्रमुच्यते ॥ इत्यभिमंत्र्य ॥ तयैव । व
स्तिऊरूजंघेचरणौकरौचमृदाप्रत्येकंतूष्णींत्रिस्त्रिरनुलिप्य पुनर्हस्तौप्रक्षाल्याचम्य
तीर्थोदकायनमइतिकायावाङ्मनोभिस्तीर्थोदकंनमस्कुर्यात्॥ ततस्तृतीयभागेनमृ
दाइदंविष्णुरितिमंत्रेणदक्षिणपाणिगृहीतयामृदाललाटादिनाभिपर्यंतानि गात्राण्यनु
लिंपेत् ॥ वामहस्तस्थयानाभेरधःपादपर्यंतानिइदंविष्णुरितिमेधातिथिर्ऋषिर्वि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्णुर्देवतागायत्रीच्छंदः अनुलेपनेविनियोगः ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदं
धेपदम् ॥ समूढमस्यपांसुरेस्वाहा ॥ स्मार्तकर्मणिकंडिकांतोमंत्रः सर्वत्र ॥
तथाच रेणुः ॥ गृह्यकर्मसुयेमंत्रा ज्ञेयाः स्वाध्यायपाठतः ॥ किंचमध्यमावृत्या
स्तेनद्रुतानविलंबिताः इति ॥ तडागादिषुतोयेषुप्रत्यर्कंस्नानमाचरेत् ॥ इति । नद्या
दौतुप्रवाहाभिमुखोवास्नानमाचरेत ॥ तथाचनृसिंहपुराणे ॥ नद्यांसरःसुचस्नाया
त्प्रतिस्रोतःस्थितोद्विजः ॥ यायाःसमुद्रगानद्यस्तासुस्नानंतुसंमुखम् ॥ सर्वेऽपि
शाखिनःकुर्युर्विनावाजसनेयिनाम् ॥ इतिविशेषवाक्यान्महानद्यांसूर्याभिमुखंस्न
नंयुक्तंवाजसनेयिनाम ॥ ततःनाभिमात्रंतीर्थजलंप्रविश्यसूर्याभिमुखःस्थित्वाआ
पोअस्मानित्यादिदेवीरित्यंतेननिमज्जेत् ॥ आपोअस्मानितिमंत्रस्यप्रजापतिर्ऋ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षिरापोदेवताअत्युष्टिच्छंदः मज्जनोन्मज्जनेविनियोगः ॥ ॥ ॐआपाअस्मोन्मा
तरं÷शुंधयंतुघृतेनंनोघृतप्व÷पुनंतु ॥ विश्वꣳहिरिप्रम्प्रवहंतिदेवी ३ ॥ ततउ
दिदाभ्यइत्यादिपूतएमीत्यंतेनोन्मज्जेत् ॥ ॐउदिदाभ्यꣳशुचिरापूतएमि ॥
॥ पुनस्तूष्णींनिमज्ज्योन्मज्ज्याचामेत् ॥ अथगोमयस्नानम् ॥ गोमयमादा
य ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनम् ॥
तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ इतिमंत्रेणगोमयमभिमंत्र्य ॥ मानस्तो
कइतिमंत्रस्य कुत्सऋषिःरुद्रोदेवता जगतीच्छंदः ॥ अंगानुलेपनेविनि
योगः ॥ मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः ॥ मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे ॥ इतिमंत्रेणसोदकंगोमयं
सूर्यायदर्शयित्वातेनत्रिवारंपूर्वमृल्लेपनवल्ललाटादिपादतलपर्यंतान्यंगान्यनुलिप्य
प्रक्षालयेत् ॥ अथभस्मस्नानम्॥भस्मादाय ॥ अग्निरितिभस्मजलमितिभस्मस्थल
मितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्ममनएतानिचक्षूँषिभस्मानीति ॥ ॐप्रस
द्यभस्मनायोनिमपश्चपृथिवीमग्न ॥ सृंसृज्यमातृभिष्टुंज्योतिष्मान्पुनरासदं ॥
इतिमंत्रेणललाटाद्यंगेषुभस्मलेपनंकृत्वाभस्मलिप्तएववक्ष्यमाणैरष्टभिर्मंत्रैःप्रतिमंत्रं
कुंभमुद्रयादक्षिणचुलकेनवाशिरोभिषिंचेत् ॥ दक्षांगुष्ठंपरांगुष्ठेक्षिप्त्वाहस्तद्वयेनतु ॥
सावकाशामेकमुष्टिंकुर्यात्साकुंभमुद्रिका ॥ इति ॥ मंत्रायथा ॥ ॥ इमंमेवरुणेति
मंत्रस्यशुनःशेपऋषिर्वरुणोदेवतागायत्रीच्छंदःअभिषेकेविनियोगः ॥ ॐइमंमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ तत्वायामीतिमंत्रस्यशुनःशेपऋषि
र्वरुणोदेवतात्रिष्टुप्छंदःअभिषेकेविनियोगः ॥ ॐतत्वायामिब्रह्मणावंदमानस्तदा
शास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्यरुशꣳसमानआयुःप्रमोषीः ॥
त्वंनइतिमंत्रस्यवामदेवऋषिःअग्नीवरुणौदेवतेत्रिष्टुप्छंदः अभिषेकेविनियोगः ॥
ॐ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमꣳशोशु
चानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ सत्वंनइतिमंत्रस्यवामदेवऋषिः अग्नीवरुणौ
देवतेत्रिष्टुप्छंदः अभिषेकेविनियोगः ॥ ॐसत्वंनोअग्नेऽवमोभवोतीनेदिष्ठोअस्याउ
षसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधि ॥ मापइतिमंत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यप्रजापतिर्ऋषिः हृदयशूलंदेवतायजुश्छंदःअभिषेकेविनियोगः ॥ ॐमापोमौष
धीर्हिंसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमुञ्च ॥ यदाहुरघ्न्याइतिवरुणेतिशपामहे
ततोवरुणनोमुञ्च ॥ उदुत्तममितिमंत्रस्यशुनःशेपऋषिर्वरुणोदेवातात्रिष्टुप्छंदः अभि
षेकेविनियोगः ॥ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथा
वतमादित्यव्रतेतवानागसोअदितयेस्याम ॥ मुंचंत्वितिमंत्रस्यआथर्वणोभिषग्बं
धुर्ऋषिरोषधयोदेवताअनुष्टुप्छंदः अभिषेकेविनियोगः ॥ ॐमुंचंतुमाशपथ्यादथो
वरुण्यादुत ॥ अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ अवभृथेत्यस्यप्रजा
पतिर्ऋषिर्यज्ञोदेवताअनुष्टुप्छंदः अभिषेकेविनियोगः ॥ ॐअवभृथनिचुंपुणनिचेरु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रांसिनिचुंपुणः ॥ ऽअवंदेवैर्देवकृतमनोयामिषमवमर्त्यैमर्त्यकृतंपुरुराव्णोदेवरिषस्पा
हि ॥ इति ॥ ततस्तूष्णींनिमज्ज्याचामेत् ॥ अथदर्भमार्जनम् ॥ ततःवक्ष्य
माणैरोंकारादिभिर्मंत्रैःप्रतिमंत्रंकुशत्रयेणसजलेननाभिदक्षिणपार्श्वमारभ्यपार्णिशि
रउपरिनीत्वानाभिवामपार्श्वपर्यंतंप्रदक्षिणमात्मानंपावयेत् ॥ मंत्रायथा ॥ ॐ कार
स्यपरब्रह्मऋषिः परमात्मादेवतागायत्रीच्छंदःपावनेविनियोगः ॥ ॐपुनातु ॥ इमं-
मेइतिमंत्रेण ॥ सप्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा
ऋषयः अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवादेवताःगायत्र्युष्णिगनुष्टुब्जगतीत्रि
ष्टुप्पंक्तिबृहतीछंदांसिपावनेविनियोगः ॥ ॐभूःपुनातु ॥ तत्वायामि०इतिमंत्रेण ॥
ॐभुवःपुनातु ॥ त्वंनोअग्ने० इतिमंत्रेण ॥ ॐस्वःपुनातु ॥ सत्वंनोअग्ने० इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मंत्रेण ॥ ॐमहःपुनातु ॥ मापोमौषधी० इतिमंत्रेण ॥ ॐजनःपुनातु ॥ उदुत्तमं० इतिमंत्रेण ॥ ॐतपःपुनातु ॥ मुंचंतुमा०इतिमंत्रेण ॥ ॐसत्यंपुनातु ॥ अवभृथ० इतिमंत्रेण ॥ तत्सवितुरितिमंत्रस्यविश्वामित्रऋषिःसवितादेवतागायत्रीच्छंदःपावनेविनियोगः॥ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ॐसर्वंपुनातु ॥ आपोहिष्ठेतितिसृणांसिंधुद्वीपऋषिरापोदेवतागायत्रीच्छंदःपावनेविनियोगः ॥ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ पुनातु ॥ इदमित्यस्यप्रजापतिर्ऋषिरापोदेवतामहापंक्तिश्छंदःपावनेविनियोगः ॥ ॐइदमापःप्रवहतावद्यंचमलंचयत् ॥ यच्चा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिदुद्रोहानृतंयच्चशेपेअभीरुणम् ॥ आपोमातस्मादेनसत्पवमानश्चमुंचतु ॥ पुना
तु ॥ हविष्मतीरितिमंत्रस्यप्रजापतिर्ऋषिर्लिंगोक्तादेवताअनुष्टुप्छंदःपावनेविनियो
गः ॥ ॐहविष्मतीरिमाआपोहविष्माँ२आविवासति ॥ हविष्मान्देवोअध्वरोह
विष्माँ २ अस्तुसूर्य्य ÷ ॥ पुनातु ॥ देवीरापइतिमंत्रस्यप्रजापतिर्ऋषिरापोदेवतापं
क्तिश्छंदःपावनेविनियोगः ॥ ॐदेवीरापोअपान्नपाद्योवऊर्मिर्हविष्यऽइंद्रियावान्म
दिन्तमः ॥ तंदेवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषांभागस्थस्वाहा ॥ पुनातु ॥ कार्षि
रसीत्यादीनांत्रयाणांमंत्राणांप्रजापतिर्ऋषिः । कार्षिरसीत्यक्षरचतुष्टयस्याज्यंदेव
तासमुद्रस्यसमायइत्यस्यचापोदेवतात्रयाणामनुष्टुप्छंदः पावनेविनियोगः ॥ ॐका
र्षिरसिसमुद्रस्यत्वाक्षित्याउन्नयामि ॥ समापोअद्भिरग्मतसमोषधीभिरोषधीःपुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु॥अपोदेवाइतिमंत्रस्यवरुणऋषिरापोदेवतात्रिष्टुप्छंदःपावनेविनियोगः॥ ॐअपोदे
वामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥याभिर्मित्रावरुणावभ्यषिंचन्याभि
रिंद्रमनयन्नत्यरातीः ॥ पुनातु ॥ द्रुपदादिवेतिमंत्रस्यप्रजापत्यश्विसरस्वत्यऋषयः
आपोदेवताअनुष्टुप्छंदः पावनेविनियोगः ॥ ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोम
लादिव ॥ पूतंपवित्रेणवाज्यमापःशुधंतुमैनसः ॥ पुनातु ॥ शंनोदेवीतिमंत्रस्यसिंधु
द्वीपऋषिःगायत्रीच्छंदःआपोदेवतापावनेविनियोगः ॥ ॐशन्नोदेवीरभिष्टयआपो
भवंतुपीतये ॥ शंय्योरभिस्रवंतुनः ॥ पुनातु ॥ अपाꣳरसमितिमंत्रस्यबृहस्पतिर्ऋ
षीरसोदेवताअनुष्टुप्छंदःपावनेविनियोगः ॥ ॐअपाꣳरसमुद्वयसꣳसूर्य्येसंतꣳस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माहितम् ॥ अपाꣳसंरस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोऽसींद्रायत्वाजुष्टंगृ
ह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम् ॥ पुनातु ॥ अपोदेवीरितिमंत्रस्यसिंधुद्वीपऋषि
रापोदेवतान्यंकुसारिणीबृहतीच्छंदःपावनेविनियोगः ॥ ॐअपोदेवीरुपंसृजमधुमत
रियक्ष्मायंप्रजाभ्य÷॥तासामास्थानादुज्जिहतामोषंधयःसुपिप्पलाः॥पुनातु ॥पुनंतु
मेत्यस्यप्रजापतिर्ऋषिःपितरोदेवताअनुष्टुप्छंदःपावनेविनियोगः ॥ ॐपुनंतुमापितरं
÷सोम्यासं÷पुनंतुमापितामहाःपुनंतुप्रपितामहाः॥पवित्रेणशतायुषा ॥पुनातु ॥ पुनंतु
मेत्यस्यप्रजापतिर्ऋषिःपितरोदेवताअनुष्टुप्छंदःपावनेविनियोगः ॥ ॐपुनंतुमापिता
महाःपुनंतुप्रपितामहाः॥पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ पुनातु ॥ अग्नइतिमंत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यवैश्वानरऋषिरग्निर्देवताअनुष्टुप्छंदःपावनेविनियोगः ॥ ॐअग्नआयूꣳषिपवस
आसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनाम् ॥ पुनातु ॥ पुनंतुमेतिमंत्रस्यप्रजाप
तिर्ऋषिर्लिंगोक्तादेवताअनुष्टुप्छंदःपावनेविनियोगः ॥ ॐपुनंतुमादेवजनाःपुनंतुम
नसाधियः ॥ पुनंतुविश्वाभूतानिजातवेदःपुनीहिमा ॥ पुनातु ॥ पवित्रेणपुनीहि
मेतिमंत्रस्यप्रजापतिर्ऋषिरग्निर्देवतागायत्रीच्छंदःपावनेविनियोगः॥ॐपवित्रेणपुनी
हिमाशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूँ१रनु ॥ यत्तइतिमंत्रस्यप्रजापतिर्ऋषिरग्निर्दे
वतातृतीयपादस्यब्रह्मादेवतागायत्रीच्छंदःपावनेविनियोगः ॥ ॐयत्तेपवित्रमर्च्य
ष्यग्नेव्वितंतमंतरा ॥ ब्रह्मतेनपुनातुमा॥पुनातु ॥ पवमानइतिमंत्रस्यप्रजापतिर्ऋषिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोदेवतागायत्रीच्छंदः पावनेविनियोगः ॥ ॐपवमानःसोअद्यनः÷पवित्रेणवि
चर्षणिः ॥ यःपोतासपुनातुमा ॥ पुनातु ॥ उभाभ्यांदेवेतिमंत्रस्यप्रजापतिर्ऋ
षिःसवितादेवतागायत्रीच्छंदः पावनेविनियोगः ॥ ॐ उभाभ्यांदेवसवितःपवित्रे
णसवेनच ॥ मांपुनीहिविश्वतः÷ ॥ पुनातु ॥ वैश्वदेवीपुनतीतिमंत्रस्यप्रजापतिर्ऋ
षिर्विश्वेदेवादेवतात्रिष्टुप्छंदःपावनेविनियोगः ॥ ॐवैश्वदेवीपुनतीदेव्यागाद्यस्यामि
माबह्वस्तन्वोवीतपृष्ठाः॥ तयामदंत सधमादेषुवयꣳस्यामपतयोरयीणाम्॥पुनातु॥
इतिमन्त्रैर्दर्भैर्मार्जयित्वोदकंस्पृशेत् ॥ अग्निष्टोमकर्मणिदीक्षितकर्तृकपावनवत्पाव
नमंत्रकुशपवित्रैश्चित्पतिर्मेतिपावयतीतिसूत्रदर्शनात् ॥ चित्पतिमेतित्रयाणांप्रजाप
तिर्ऋषिः चित्पतिर्मावाक्पतिर्मेत्युभयोः प्रजापतिर्देवतादेवोमेत्यस्यसवितादेवतायजु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्छंदः पावनेविनियोगः ॥ ॐचित्पतिर्मापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ॥ पुनातु ॥एवंनाभेरूर्ध्वंपावयित्वावाक्पतिर्मेत्यारभ्यतच्छकेयमित्यंतेननाभेर्मध्यंपावयेत् ॥ ॐवाक्पतिर्मापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥पुनातु ॥ इत्यनेनमध्यम्॥देवोमेत्यारभ्यतच्छकेयमित्यंतेननाभेरधःपावयेत् ॥ॐदेवोमांसवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकयम्॥पुनातु॥पुनःसमुच्चयेनसर्वांगंपावयेत् ॥ ततःपूर्वोक्तप्रकारेण ॥ ॐपुनातु ॥ ॐभूः पुनातु ॥ ॐभुवःपुनातु ॥ ॐस्वःपुनातु ॥ ॐम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हःपुनातु ॥ ॐजनःपुनातु ॥ ॐतपःपुनातु ॥ ॐसत्यंपुनातु ॥ ॐतत्सवितुर्वरेण्यं
भर्गो०पुनातु ॥ इमंमे०तत्वायामि ब्रह्मणा०त्वंनः०सत्वंनः०मापोमौषधीर्हिंसीर्धा
म्नोधाम्नोराजँस्ततोवरुणनोमुंच ॥ यदाहुरघ्न्याइतिवरुणेतिशपामहेततोवरुणनो
मुंच ॥ उदुत्तमंवरुणपाशंमस्मदवाधमंविमध्यमꣳश्रथाय॥ अथावयमादित्यव्रतेतवा
नागसोअदितयेस्याम ॥ मुंचंतमाशपथ्यादथावरुण्यादुत ॥ अथोयमस्यपड्वीशा
त्सर्वस्माद्देवकिल्बिषात् ॥ अवभृथनिचूंपणनिचेरुरसिनिचंपुण ॥ अवदेवैर्देवकृतमे
नोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराण्णोदेवरिषस्पाहि ॥ अथापामार्गमार्जनम् ॥ तत
अपाघमित्यनेनापामार्गैस्त्रिभिर्मार्जयेत्॥ अपाघमित्यस्यशुनःशेपऋषिर्लिंगोक्तादेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताअनुष्टुप्छंदः अपामार्जनेविनियोगः ॥ ॐअपाघमपकिल्बिषमपकृत्यामपोरप÷
॥अपामार्गत्वमस्मदपदुष्वन्यत्सुव ॥ पुनातु ॥ ततःकांडात्कांडादितिमंत्रेणदूर्वांकु
रैस्तिसृभिमाजयेत् ॥ कांडात्कांडादितिमंत्रस्याग्निर्ऋषिर्दूर्वेष्टकादेवताअनुष्टुप्छंदः
मार्जनेविनियोगः॥ ॐकांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनु
सहस्रेणशतेनच ॥ अथाघमर्षणम् ॥ ततोंऽतर्जलेमग्नोऽनुच्छ्वसन्नघमर्षयेत ॥ ऋतंच
सत्यंचेत्यस्याघमर्षणऋषिःभाववृत्तंदैवतंअनुष्टुप्छंदः अघमर्षणेविनियोगः ॥ ॐऋ
तंचसत्यंचाभीद्धातपसोऽध्यजायत ॥ ततोरात्र्यजायततःसमुद्रोअर्णवः ॥ समुद्रा
दर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ ॥ सूर्याचंद्र
मसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिजमथोस्वः ॥ इतित्रिरावर्तये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्॥ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव॥पूतंपवित्रेणेवाज्यमापः ÷ शुंधंतुमै
नंसः ॥ इतित्रिःपठेत् ॥ आयंगौरित्येतेषांत्रयाणांमंत्राणांप्रजापतिर्ऋषिराग्निःपराव
ररूपोदेवतागायत्रीच्छंदःअघमर्षणेविनियोगः ॥ ॐआयंगौःपृश्निरक्रमीदसदन्मा
तरंपुरः ॥ पितरंचप्रयन्त्स्वः ÷ ॥ इतिऋचंत्रिरावर्तयेत ॥ सशिरसंप्राणायामंवात्रिः
पठेत ॥ ॐभूःॐभुवःॐस्वःॐमहःॐजनःॐतपःॐसत्यंॐतत्सवितुर्वरेण्यंभर्गो
देवस्यधीमहि ॥ धियोयोनः ÷ प्रचोदयात् ॥ आपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरो
म् ॥ इतिचत्रिःपठेत् ॥ ततःपरमात्मानंशेषशायिनंसायुधंसश्रीकंचतुर्भुजंविष्णुंध्या
येत् ॥ ततःस्नानांगतर्पणम् ॥ अत्रार्थेविष्णुः ॥ स्नातश्चार्द्रवासादेवर्षिपितृतर्पणमं
भःस्थएवकुर्वीतेति ॥ पराशरोऽपि॥ नित्यंनैमित्तिकंकाम्यंत्रिविधं स्नानमुच्यते तर्प

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णंतुभवेत्तस्यतदंगत्वेनकीर्तितम् ॥ बाहुपूर्णांतिलैःकृत्वाजलस्थस्तर्पयेत्पितॄन्॥स्थल
स्थेननकर्तव्यंपितॄणांतृप्तिमिच्छता ॥ रोमस्थैस्तिलैर्नतर्पयेदितितुब्रह्मयज्ञोत्तरतर्पण
एव ॥ ॐब्रह्मादयोदेवास्तृप्यंताम् ॥ ॐभूर्देवास्तृप्यंताम् ॥ॐभुवर्देवास्तृप्यंताम्॥
ॐस्वर्देवास्तृप्यंताम् ॥ ॐभूर्भुवःस्वर्देवास्तृप्यंताम् ॥ निवीतीभूत्वा ॥ ॐसन
कादिद्वैपायनादयऋषयस्तृप्यंताम् ॥ ॐभूर्ऋषयस्तृप्यंताम् ॥ ॐभुवर्ऋषय
स्तृप्यंताम् ॥ ॐस्वर्ऋषयस्तृप्यंताम् ॥ ॐभूर्भुवःस्वर्ऋषयस्तृप्यंताम् ॥ अपस
व्यंकृत्वा ॥ अकव्यवाडनलादयः पितरस्तृप्यंताम् ॥ ॐभूःपितरस्तृप्यंताम् ॥
ॐभुवःपितरस्तृप्यंताम् ॥ ॐस्वःपितरस्तृप्यंताम् ॥ अभूर्भुवःस्वःपितरस्तृप्यं
ताम् ॥ सव्यंकृत्वा ॥ आचमनंकुर्युः ॥ ॐमोदस्तृप्यतु ॥ ॐप्रमोदस्तृप्यतु ॥
ॐसुमुखस्तृप्यतु ॥ ॐदुर्मुखस्तृप्यतु ॥ ॐअविघ्नस्तृप्यतु ॥ ॐविघ्नकर्तातृप्यतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐब्रह्मादयोदेवास्तृप्यंतु । ॐगौतमस्तृप्यतु । ॐभरद्वाजस्तृप्यतु । ॐविश्वामित्रस्तृप्यतु । ॐजमदग्निस्तृप्यतु । ॐवसिष्ठस्तृप्यतु । ॐकश्यपस्तृप्यतु । ॐअत्रिस्तृप्यतु । ॐ दक्षस्तृप्यतु । ॐमरीचिस्तृप्यतु । ॐअंगिरास्तृप्यतु । ॐपुलहस्तृप्यतु । ॐपुलस्त्यस्तृप्यतु । ॐक्रतुस्तृप्यतु । ॐप्रचेतास्तृप्यतु । ॐभृगुस्तृप्यतु । ॐमनवस्तृप्यंतु । इतिगोशृंगमात्रंजलमुद्धृत्यदेवतीर्थेनएकैकमंजलिंजलेप्राङ्मुखःप्रक्षिपेत् ॥ येनतीर्थेनांजलिपूरणंतेनैवप्रक्षेपःसर्वत्र । अथोदङ्मुखोनिवीत्यूर्ध्वमुखस्तिरश्चोदक्षिणाग्रान्कुशान्कृत्वोदगग्रान्वाप्राजापत्येनतीर्थेनसनकादींस्तर्पयेत् ॥ सनकादयोमनुष्यास्तृप्यंतु ॥ द्वावंजली ॥ ततोपसव्यम् ॥ तानेवकुशान्मूलाग्राभ्यांद्विगुणीकृत्यदक्षिणामुखःपितृतीर्थेनकव्यवाडनलादींस्तर्पयेत् ॥ कव्यवाडनलादयोदेवपितरस्तृप्यंतु । त्रयोंऽजलयः ॥ अस्मत्पितृपितामहप्रपितामहास्तृ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्यंतु ॥ मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यंतु । आब्रह्मस्तंबपर्यंतंजगत्तृप्यतु
अत्रपराशरः।शुक्लैस्तुतर्पयेद्देवान्मनुष्यान्धवलैस्तिलैः॥पितॄन्संतर्पयेत्कृष्णैस्तर्पणेसर्व
दाद्विजः॥इति।आश्वलायनः स्नानांगतर्पणंकृत्वायक्ष्मणेजलमाहरेत् ॥ यन्मयादूषितं
तोयंशारीरमलसंचयैः ॥ तस्यपापस्यशुद्ध्यर्थंयक्ष्मैतत्तेतिलोदकम् ॥ इत्याह ॥तत
स्तीरमागत्य । अग्निदग्धाश्चयेजीवायेऽप्यदग्धाःकुलेमम॥ भूमौदत्तेनतृप्यंतुतृप्तायां
तुपरांगतिम् ॥ इतिजलांजलिंतटेनिक्षिपेत् ॥ लतागुल्मेषुवृक्षेषुपितरोयेव्यवस्थि
ताः ॥ तेसर्वेतृप्तिमायांतुमयोत्सृष्टैःशिखोदकैः ॥ इतिमंत्रेणस्वदक्षिणभागेशिखाग्रं
निष्पीडयेत् ॥ इतिस्नानांगतर्पणम् ॥ एवमुक्तविधिनास्नानांगतर्पणंकृत्वाज
लाद्बहिर्निष्क्रम्यअरजकक्षालितेसदशेशुष्केअनग्निदग्धेअच्छिद्रे अस्यूतेगैरिकादिरा
गेणाविकृतेशुक्लेकार्पासनिर्मितेपरिधानीयोत्तरीयवाससीपरिधायप्रशस्तदारुनिर्मिते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुशत्रयाच्छन्न आसने प्रागास्योवोदगास्यउपविशेत् ॥ ततोगंगादितीर्थमृत्तिक
यागार्हपत्यौपासनाग्निभस्मनावागोपीचंदनेनवायथाधिकारीभाले त्रिपुंड्रमूर्ध्वपुंड्रं
वातिलकंकुर्यात् ॥ अत्रार्थे ब्रह्मांडपुराणे चोक्तम् । ऊर्ध्वपुंड्रंद्विजःकुर्यात्क्षत्रियस्तु-
त्रिपुंड्रकम् ॥ अर्धचंद्रंतुवैश्यस्यवर्तुलंशूद्रजातिषु ॥ दग्धंजीर्णंचमलिनंमूषकापहृतं
तथा ॥ खादितंगोमहिष्याद्यैस्तत्त्याज्यंसर्वथाद्विजैः ॥ जीवत्पितृकेनोत्तरीयंवस्त्रंनधा
र्यम् । उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा ॥ नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदि ॥
इतिवचनात् ॥ ततःकुशपवित्रोपग्रहपाणिः पादौजलेस्थलेवाकृत्वापूर्ववद्विराचम्यभग
वंतंपरमात्मरूपंनारायणंस्मृत्वामन्यान्हसंध्योपासनमारभेत् ॥ तत्रैवंक्रमः ॥ अथम
ध्यान्हसंध्या ॥ ममोपात्तदुरितक्षयद्वारारुद्रावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थंमध्यान्हसंध्यो
पासनमहंकरिष्ये ॥ आगच्छवरदेदेवित्र्यक्षरेरुद्रवादिनि ॥ सावित्रिच्छंदसांमातारुद्रयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेनमोऽस्तुते॥ आदौमध्यान्हसंध्यास्वरूपांविभावयेत्॥ तच्चेत्थम् ॥ मध्यान्हसंध्या
श्वेतपदाश्वेतासनस्था श्वेतांबरा श्वेतवर्णाश्वेतमाल्यानुलेपनापंचमुखीदशभुजात्रिने
त्रात्रिशूलाक्षमालाकमंडलुकपालधारिणीसर्वाभरणभूषितासावित्रीयुवती वृषभवाहि
नीयजुर्वेदसंहितारुद्रदैवत्यात्रिपदाषट्कुक्षिःपंचशीर्षाग्निमुखारुद्रशिखाविष्णुहृदयाब्र
ह्मकवचासांख्यायनसगोत्राशुक्लवर्णाकर्मज्ञानोविनियोगः ॥ ततःप्राणायामंकुर्यात् ॥
ॐकारस्यब्रह्मऋषिर्गायत्रीछंदःपरमात्मादेवताप्राणायामेविनियोगः ॥ सप्तव्याहृती
नांप्रजापतिविश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषयः अग्निवायु
सूर्यबृहस्पतिवरुणेंद्रविश्वेदेवादेवताः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छं
दांसिप्राणायामेविनियोगः ॥ तत्सवितुरितिविश्वामित्रऋषिःसवितादेवतागायत्री
च्छंदःप्राणायामेविनियोगः॥ आपोज्योतिरितिप्रजापतिर्ऋषिर्ब्रह्माग्निसूर्यादेवताद्वि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदागायत्रीच्छंदः ॥ प्राणायामेविनियोगः ॥ एवंऋष्यादिकंस्मृत्वाबद्धासनोमौनसिं
मीलितनयनोदक्षिणपाण्यंगुष्ठेनदक्षिणनासिकां पीडयंस्तथाकनिष्ठिकानामिकाभ्या
मुत्तरनासिकांपीडयन्मध्यमातर्जन्यौमुंचन्सव्याहृतिकांसप्रणवांसशिरसांगायत्रींपूर
ककुंभकरेचक्रमेणत्रिःपठेत॥ॐभूःॐभुवःॐस्वःॐमहःॐजनःॐतपःॐसत्यंॐत
त्सावितुर्वरेण्यंभर्गो०स्वरोम् ॥ इतिमंत्रान्नवधावृत्यमनसापठेत् ॥ ततआपः पुनंत्वि
तिआचमनंकुर्यात् ॥ आपःपुनंत्वितिमंत्रस्यकश्यपऋषिरापोदेवताअनुष्टुप्छंदः
आचमनेविनियोगः ॥ॐआपःपुनंतुपृथिवींपृथ्वीपूतापुनातुमाम् ॥ यदुच्छिष्टमभो
ज्यंचयद्वादुश्चरितंमम ॥ सर्वंपुनातुमामापोऽसतांचप्रतिग्रहꣳस्वाहा ॥ इतिमंत्रे
णसकृदपआचम्यस्मार्ताचमनंकृत्वा साग्रान्कुशान्दक्षिणपाणौ धृत्वापोहिष्ठेत्या
दित्र्यृचेननवभिःपादैःप्रतिपादंशिरोहृदयपादयुगलानिमार्जयेत् ॥ आपोहिष्ठेतिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सृणांसिंधुद्वीपऋषिरापोदेवतागायत्रीच्छंदःमार्जनेविनियोगः ॥ ॐआपोहिष्ठामयोभुवः॥ शिरसि ॥ ॐतानऊर्जेदधातन ॥ पादयोः ॥ ॐमहेरणायचक्षसे॥ हृदये ॥ ॐयोवःशिवतमोरसः ॥ हृदये ॥ ॐतस्यभाजयतेहनः॥ पादयोः ॥ ॐउशतीरिवमातरः ॥ शिरसि ॥ ॐतस्माऽअरंगमामवः ॥ शिरसि ॥ ॐयस्यक्षयायजिन्वथ ॥ हृदये ॥ ॐआपोजनयथाचनः ॥ पादयोः ॥ तथाचस्मृतिः । आपोहिष्ठेत्यृचैःकुर्यान्मार्जनन्तुकुशोदकैः । प्रणवेनतुसंयुक्तंक्षिपेद्वारिपदेपदे ॥ इति ॥ततश्चुलकेनजलमादायतस्मिन्नासिकाग्रंनिधायद्रुपदादिवेतिऋचंपठित्वातज्जलं भूमावुत्सृज्यपुष्पाणिपत्राणिचांबुमिश्राणिअंजलिनादायोत्थायप्रणवव्याहृतिपूर्विकया गायत्र्यैकांजलिंसूर्य्याभिमुखमुखमुत्क्षिपेत् ॥ ततऊर्ध्वबाहुःसूर्यमुदीक्षमाणोवक्ष्यमाणै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मंत्रैः सूर्योपस्थानंकुर्यात् ॥ तत्रमंत्राः ॥ उद्वयमितिमंत्रस्यप्रस्कण्वऋषिःसूर्योदेवता अनुष्टुप्छंदःसूर्योपस्थानेविनियोगः ॥ ॐउद्वयंतमसस्परिस्वःपश्यंतउत्तरम् ॥ देवंदेवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ उदुत्यमितिमंत्रस्यप्रस्कण्वऋषिःसूर्योदेवता गायत्रीच्छंदःसूर्योपस्थानेविनियोगः ॥ ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥ चित्रंदेवानामितिमंत्रस्यप्रकुत्सांगिरसऋषिःसूर्योदेवतात्रिष्टुप्छंदः सूर्योपस्थानेविनियोगः ॥ ॐचित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्य्यआत्माजगतस्तस्थुषश्च ॥ तच्चक्षुरितिमंत्रस्यदध्यङ्ङाथर्वणऋषिः सूर्योदेवताब्राह्मीत्रिष्टुप्छंदः सूर्योपस्थानेविनियोगः ॥ ॐतच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतमशरदःतः शृणुयाम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरदः ÷ शतंप्रब्रवामशरदः ÷ शतमदीनाःस्यामशरदः ÷ शतंभूयश्चशरदः÷शतात् ॥
अथध्यानम् ॥ ॐतरुणार्कमंडलस्थांमध्ययुवतींसर्वशुक्लांपंचवक्त्रामग्निनेत्रामिंदुक
लाभूषणांत्रिशूलखड्गखट्वांगडमर्वंकुशचतुर्भुजांवृषभासनस्थां रुद्रदैवत्यांयजुर्वेदमु
दाहरंतींभूर्लोकाधिष्ठात्रींसावित्रींनामदेवतांध्यात्वाजपंकुर्यात् ॥ तेजोऽसीतिपरमे
ष्ठीप्रजापतिर्ऋषिर्यजुश्छंदआज्यंदेवतागायत्र्यावाहनेविनियोगः ॥ ॐतेजोऽसि
शुक्रमस्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेवयजनमसि ॥ प्रणवस्यपर
ब्रह्मऋषिःपरमात्मादेवतागायत्रीच्छंदः ॥ व्याहृतीनांप्रजापतिर्ऋषिराग्निवायु
सूर्यादेवतागायत्र्युष्णिगनुष्टुप्छंदांसि । तत्सवितुरितिविश्वामित्रऋषिःसवितादेवता
गायत्रीच्छंदःजपेविनियोगः ॥ ॐभूर्भुवःस्वः÷तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धियोयोनःप्रचोदयात् ॥ इतिदशावरांशतमध्यांसहस्रपरमांवाजपेत् ॥ ततोविभ्रा
डित्यनुवाकसहस्रशीर्षेतिपुरुषसूक्तशिवसंकल्पमंडलब्राम्हणैःसूर्यमुपतिष्ठेत् ॥ विभ्रा
डित्यस्यविभ्राट्सौर्यऋषिःसूर्योदेवतात्रिष्टुप्छंदः ॥ उदुत्यमितितिसृणांप्रस्कण्वऋ
षिःसूर्योदेवतागायत्रीच्छंदः ॥ तंप्रत्नथेत्यस्यकाश्यपवत्सावृषीसोमोदेवतात्रिष्टुप्छं
दः ॥ अयंवेनइत्यस्यवेनऋषिःसोमोदेवतात्रिष्टुप्छंदः ॥ चित्रमित्यस्यकुत्सांगिरस
ऋषिःसूर्योदेवतात्रिष्टुप्छंदः ॥ आनइत्यस्यागस्त्यऋषिःसूर्योदेवतात्रिष्टुप्छंदः ॥ य
दद्येत्यस्यश्रुतकक्षसुतकक्षावृषीसूर्योदेवतागायत्रीच्छंदः ॥ तरणिरित्यस्यप्रस्कण्व
ऋषिःसूर्योदेवतागायत्रीच्छंदः ॥ तत्सूर्य्यस्येतिद्वयोःकुत्सऋषिःसूर्योदेवतात्रिष्टुप्छं
दः ॥ बण्महानितिद्वयोर्जमदग्निर्ऋषिःसूर्योदेवताआद्यस्यबृहतीच्छंदः ॥ श्रायंतइवे
त्यस्यनृमेधाऋषिःसूर्योदेवताबृहतीच्छंदः ॥ अद्यादेवाइत्यस्यकुत्सऋषिःसूर्यो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवतात्रिष्टुप्छंदः॥ आकृष्णेनेत्यस्याहिरण्यस्तूपांगिरसावृषीसूर्योदेवतात्रिष्टुप्छंदः॥
सूर्योपस्थानेविनियोगः ॥ ॐव्विभ्राड्बृहतपिबतुसोम्यंमध्वायुर्दधद्यज्ञपतावि
विहुतम् ॥ वातंजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति ॥ उदुत्य
म् ॥ ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवं ÷ ॥ दृशेविश्वायसूर्य्यम् ॥ येनापा
वकचक्षसाभुरण्यंतजनाँ २ अनु ॥ त्वंवरुणपश्यसि ॥ दैव्यावध्वर्यूआगंतद्धर
थेनसूर्य्यत्वचा ॥ मद्वायज्ञ्ञसमंजाथे ॥ तंप्रत्नथायंवेनश्चित्रंदेवानाम् ॥ तं
प्रत्नथा । तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदंस्वर्विदम् ॥ प्रतीचीनं
वृजनंदोहसेधुनिमाशुंजयंतमनुयासुवर्धसे ॥ अयंवेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रायूरजसोविमाने ॥इममपाᳬसंगमेयसूर्यस्यशिशुन्नविप्रामतिभीरिहांति॥चित्रंदेवाना
म् ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरि
क्षᳬसूर्य्यआत्माजगतस्तस्थुषश्च ॥ आन÷ ॥ आनइडाभिर्विदथेसुशास्तिविश्वानरᳬ
सविताद्देवएतु ॥ अपियथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा ॥ यदद्य ॥
यदद्यकच्चवृत्रहन्नुदगाअभिसूर्य्य ॥ सर्वंतदिन्द्रतेवसे ॥ तरणि÷ ॥ तरणिर्विश्वदर्शतो
ज्योतिष्कृदसिसूर्य्य ॥ विश्वमाभासिरोचनम् । तत्सूर्य्यस्यदेवत्वंतन्महित्वंमध्याक
र्तोर्वितत्तᳬसंजभार ॥ यदेदयुक्तहरित÷सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ त
न्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौरुपस्थे ॥ अनंतमन्यद्रुशदस्यपाज÷

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णमन्यद्धरितःसंभरंति ॥ वणमहाँअसिसूर्य्यबडादित्यमहाँ२असि ॥ महस्तेसतो
महिमापनस्यतेऽद्धादेवमहाँ२असि ॥ बट्सुर्य्यश्रवसामहाँ२असिसत्रादेव महाँ२असि
मन्हादेवानामसुर्य्यःपुरोहितोविभुज्योतिरदाभ्यम् ॥श्रायंतइवसुर्य्यंविश्वेदिंद्रस्यभक्ष
त ॥ वसूनिजातेजनपानओजसाप्रतिभागंनदीधिम ॥ अद्यादेवाउदितासुर्य्यस्यनि
रहसःपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउत
द्यौः ॥ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेना
देवोयातिभुवनानिपश्यन् ॥ ततःपुरुषसूक्तंजपेत् ॥ सहस्रशीर्षेतिषोडशर्चस्यनारा
यणः पुरुषऋषिःपंचदशानामनुष्टुप्छंदः षोडश्यास्त्रिष्टुप्छंदः पुरुषोदेवतासूर्योपस्था

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेविनियोगः ॥ ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंसर्वतस्पृत्वा
त्यतिष्ठद्दशांगुलम् ॥ पुरुषएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयद
न्नेनातिरोहति॥एतावानस्यमहिमातोज्यायाँश्चपुरुषः॥पादोस्यविश्वाभूतानित्रिपा
दस्यामृतंदिवि॥त्रिपादूर्ध्वउदैत्पुरुषःपादोऽस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्राम
त्साशनानशनेअभि॥ततोविराडजायतविराजोअधिपूरुषः॥ सजातोअत्यरिच्यतप
श्चाद्भूमिमथोपुरः॥तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानार
ण्याग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥ छंदांꣳसिजज्ञिरेत
स्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri.

तस्मात्तस्माज्जाताअजावयः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाअ
यजंतसाध्याऋषयश्चये ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखंकिमस्यासी
त्किंबाहूकिमूरूपादाउच्येते ॥ ब्राम्हणोऽस्यमुखमासीद्बाहूराजन्यःकृतः ॥ उरूतद
स्ययद्वैश्यःपद्भ्याᳬशूद्रोअजायत ॥ चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥ श्रो
त्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ नाभ्याआसीदंतरिक्षᳬशीर्ष्णोद्यौःसमवर्तत ॥
पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२अकल्पयन् ॥ यत्पुरुषेणहविषादेवायज्ञमतन्व
त ॥ वसंतोऽस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः
कृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुम् ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमान्यासन् ॥ तेहनाकंमहिमानः÷सचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ॥ अथशिवसं
कल्पः ॥ ॥ यज्जाग्रतइतिषट्चस्यशिवसंकल्पऋषिर्मनोदेवतात्रिष्टुप्छंदः सूर्योपस्था
नेविनियोगः ॥ ॐयज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैति ॥दूरंगमंज्योतिषांज्यो
तिरेकंतन्मेमनः÷शिवसंकल्पमस्तु ॥ येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथे
षुधीराः॥ यदपूर्वंयक्षमंतःप्रजानांतन्मेमनः÷शिवसंकल्पमस्तु ॥ यत्प्रज्ञानमुतचेतोधृ
तिश्चयज्ज्योतिरंतरमृतंप्रजासु ॥ यस्मान्नऋतेकिंचनकर्मक्रियतेतन्मेमनः÷शिवसंक
ल्पमस्तु॥येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वम् । येनयज्ञस्तायतेसहोतात
न्मेमनः÷शिवसंकल्पमस्तु॥यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभाविवा

पुस्तकालय गुरुकुल कांगड़ी

226
१-८०
३३,१८८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राः ॥ यस्मिँश्चित्तꣳसर्वमोतंप्रजानातन्मेमनः शिवसंकल्पमस्तु॥सुपारथिरश्वानिवय
न्मनुष्यान्नेनीयतेभीशुभिर्वाजिनइव ॥ हृत्प्रतिष्ठंयदजिरंजविष्ठंतन्मेमनः शिवसंक
ल्पमस्तु ॥ अथमंडलब्राह्मणम्॥मंडलब्राह्मणस्यविवस्वानृषिर्वायुर्देवतासूर्योपस्थाने
विनियोगः॥ ॐयदेतन्मंडलंतपतितन्महदुक्थन्ताऋचत्सऽऋचांलोकोऽथयदेतग्निच
र्दीप्यतेतन्महाव्रतंतानिसामानिसमाम्नांलोकोऽथयएषएतस्मिन्मंडलेपुरुषꣳसोऽर्दि
स्तानियजूꣳषिसयजुषांलोकः ॥ १ ॥ सैषात्रय्येवविद्यातपतिद्वैतदप्याविद्वाꣳसआ
हुस्त्रयीवाएषाविद्यातपतीवाग्घैवतत्पश्यंतिव्वदाति ॥ २ ॥ सएषएवमृत्युर्यएषएत
स्मिन्मंडलेपुरुषोऽथैतदमृतंयदेतदर्चिर्दीप्यतेतस्मान्मृत्युर्नाम्रियतेमृते ह्यंतस्तस्मादु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नदृश्यतेमृतेह्यंतः ॥३॥तदेषश्लोकोभवत्यंतरमृत्योरमृतामित्यवरꣳह्येतन्मृत्योरमृतंमृ
त्यावमृतमाहतीमत्यितोस्मीन्हिपुरुषएतन्मडलप्रातिष्ठितंपातमित्युर्व्विवस्वतंवस्तइ
त्यसौवाआदित्योव्विवस्वानेषह्यहोरात्रेविवस्तेतमेषवस्तेसर्वतोह्येनेन परिवृतोमृ
त्योरात्माव्विवस्वतीत्येतस्मिन्हिमंडलएतस्यपुरुषस्यात्मैतदेषश्लोकोभवति ॥४॥त
योर्व्वा एतयोरुभयोरेतस्यचार्चिषएतस्यचपुरुषस्यैतन्मंडलप्रतिष्ठातस्मान्महदुक्थं
परस्मैनशꣳसेन्नेदेतांप्रातष्ठांछिनदाइत्येताꣳहसत्प्रतिष्ठांछिन्तेयोमहदुक्थंपरस्मैश
ꣳसतितस्मादुक्थशसंभूयिष्ठंपरिचक्षतेप्रतिष्ठाच्छिन्नोहिभवतीत्यधिदैवतम्॥ ५ ॥अ
थाधियज्ञम् ॥ यदेतन्मंडलंतपत्ययꣳसरुक्मोऽथयदेतदर्चिर्दीप्यतऽइदंतत्पुष्करप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्णमापोह्येताआपःपुष्करपर्णमथयऽएषएतस्मिन्मंडलेपुरुषोऽयमेवसयोयꣳहिरण्म
यःपुरुषस्तदेतदेवैतत्त्रयꣳसꣳस्कृत्येहोपधत्तेतद्यज्ञस्यै वानुसꣳस्थामूर्ध्वमुत्क्राम
तितदेतमप्येतियऽएषतपातितस्मादग्निनाद्रियेतपरिहंतुमामुत्रह्येषतदाभवतीत्युएवा
धियज्ञम् ॥६॥ अथाध्यात्मम् ॥ यदेतन्मडलंतपातियश्चैषरुक्मइंदतच्छुक्रमक्षन्नथयदे
तदर्चिर्दीप्यतेयच्चैतत्पुष्करपर्णमिदंतत्कृष्णमक्षन्नथयऽएषऽएतस्मिन्मंडलेपुरुषोय
श्चैषाहिरण्मयःपुरुषोयमेवसयोयंदक्षिणेक्षन्पुरुषः ॥ ७ ॥ सऽएषऽएवलोकंपृणातामेष
सर्वोग्निरभिसंपद्यतेतस्यैतान्मिथुनंयोयꣳसव्येक्षन्पुरुषोधर्मुहैतदात्मनोयान्मिथुनंय
दावैसहमिथुनेनाथसर्वोथकृत्स्नःकृत्स्नतायैतद्यत्तेद्वेभवतोद्वंद्वꣳहिमिथुनंप्रजनन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तस्माद्वेद्वेलोकंपृणेऽउपधीयेतेतस्मादुद्वाभ्यांद्वाचीतिंप्रणयंति ॥ ८ ॥ सऽएषऽए
वेंद्रोयोयंदक्षिणेक्षन्पुरुषोऽथेयमिंद्राणीताभ्यां देवाएतांविधृतिमकुर्वन्नासिकांतस्मा
ज्जायायाऽअंतेनाश्नीयाद्वीर्यवान्हास्माज्जायतेव्वीर्यवंतमुहसाजनयतियस्याऽअंते
नाश्नाति॥९॥तदेतद्देवव्रतꣳराजन्यबंधवोमनुष्याणामनुतमांगोपायंतितस्मादुतेषु
व्वीर्य्यवाञ्जायतेमृतवाकाव्वयसाꣳसाक्षिप्रश्येनंजनयति ॥ १० ॥ तौहृदयस्याका
शंप्रत्यवेत्यमिथुनीभवतस्तौयदामिथुनस्यांतगच्छतोथहैतत्पुरुषःस्वापितिद्यथाहै
वेदंमानुषस्यमिथुनस्यांतंगत्वासंविदइभत्येवꣳहैवैतसंविदऽइवभवतिदैवꣳह्येतन्मि
थुनंपरमोह्येषआनन्दः॥११॥तस्मादेवंव्वित्स्वप्याल्लोक्यꣳहैतेएवतद्देवतेमिथुनेनाप्रि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येणधाम्नासमर्धयतितस्मादुहस्वपंतं धुरेवनबोधयेन्नेदेतेदेवतेमिथुनीभवंत्यौहिनसा
नीतितस्मादुहैतत्सुखपुषःश्लेष्मणमिवमुखंभवत्येतेएवतद्देवतेरेतःसिंचतस्तस्माद्रे
तसऽइदर्ठसर्वर्ठसंभवतियदिदंकिंच ॥ १२ ॥ सुऽएषऽएवमृत्युर्यऽएषऽएतस्मिन्मंडले
पुरुषोयश्चायंदक्षिणेक्षन्पुरुषस्तस्यहैतस्यहृदये पादावतिहतौतौहैतदाच्छिद्योत्क्राम
तिसयदोत्क्रामत्यथहैतत्पुरुषोम्रियतेतस्मादुहैतत्प्रेतमाहुराच्छेद्यस्येति ॥ १३ ॥ ए
षऽउऽएवप्राणएषाहीमाः सर्वाःप्रजाः प्रणयतितस्यैतेप्राणाः स्वाः सयदास्वपित्य
थैनमतेप्राणाःस्वाऽअपियंतितस्मात्स्वाप्ययः स्वाप्ययोहवैतꣳस्वप्नइत्याचक्षतेपरो
क्षंपरोक्षकामाहिदेवाः ॥ १४ ॥ सऽएतैःसुप्तोनकस्यचनवेदनमनसासंकल्पयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नव्वाचान्नस्यरसंविजानातिनऽप्राणेनगधंविजानातिनचक्षुषा पश्यतिनश्रोत्रेण शृ
णोत्येतꣳह्येतेतदापीताभवंतिसएषएकःसन्प्रजासुबहुधाव्याविष्टस्तस्मादेका सती
लोकंपृणासर्वमग्निमनुविभवत्यथयदेकएवतस्मादेका ॥ १५ ॥ तदाहुरेकोमृत्युर्बहवइ
त्येकश्चबहवश्चेतिहब्रूयाद्यदहासावमुत्रतेनैकोऽथयदिहप्रजासुबहुधाव्याविष्टस्तेनोब
हवः ॥ १६ ॥ तदाहुरंतिकेमृत्युर्दूराद्दूत्यंतिकेचदूरेचेतिहब्रूयाद्यदहायमिहाध्या
त्मंतेनांतिकेऽथयदसावमुत्रतेनोदूरे ॥ १७ ॥तदेषश्लोकोभवत्यन्नेभात्यपश्रितोरसा
नाꣳसंक्षरेमृतइतियदेतन्मंडलंतपतितदन्नमथयएषएतस्मिन्मंडलेपुरुषःसोऽत्तास-
एतस्मिन्नन्नेपश्रितोभातीत्यधिदैवतम् ॥ १८ ॥ अथाध्यात्ममिदमवशरिरमन्नमथ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योऽयंदक्षिणेक्षन्पुरुषःसोऽत्तासएतास्मिन्नन्नेपाश्रितोभाति ॥ १९ ॥ तमेतमग्निरित्य
ध्वर्यवउपासते । यजुरित्येषहीदꣳसर्वंयुनक्तिसामेतिच्छन्दोगाऽएतस्मिन्हीदꣳस
र्वꣳसमानमुक्थमितिबह्वृचाऽएषहीदꣳसर्वमुक्थापयतियातुरितियातुविदऽएतेनही
दꣳसर्व्वंयतंविषमितिसर्पाःसर्पइतिसर्पविदऽऊर्गितिदेवारायिरितिमनुष्यामायेत्यसु
राःस्वधेतिपितरोदेवजनइतिदेवजनविदोरूपमितिगंधर्वागंधऽइत्यप्सरसस्तंयथाय
थोपासतेतदेवभवतितद्धैनान्भूत्वावतितस्मादेनमेवंवित्सर्वैरेवैतैरुपासीतसर्वꣳहैत
द्भवतिसर्वꣳहैनतद्भूत्वावति॥ २०॥ सऽएषऽत्रीष्टकोग्निर्ऋगेकायजुरेकासामैकातद्य
कांचात्रचोपदधातिरुक्मऽएवतस्याऽआयतनमथयांयजुषापुरुषएवतस्याआयतन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मथयाऽंसाम्नापुष्करपर्णमेवतस्याऽआयतनमेवंत्रीष्टकः॥२१॥तेवाऽएतेऽउभेऽएष
चरुक्मऽएतच्चपुष्करपर्णमेतंपुरुषमपीतऽउभेह्यृक्सामेयजुरपीतएवंवेकेष्टकः ॥ २२ ॥
सऽएषऽएवमृत्युर्यऽएषऽएतस्मिन्मंडलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषःसऽएषऽएवंविद
आत्माभवतिसयदैवंविदस्माल्लोकात्प्रेत्यथैतमेवात्मानमभिसंभवतिसोऽमृतोभव
तिमृत्युह्यस्यात्माभवति ॥ २३ ॥ नैववाइदमग्रेवसदासीन्नैवसदासीत् ॥ इतिमंडल
ब्राह्मणम् ॥ एवंवाङ्मनःशरीरंनमस्कृत्यासनोपर्युपविशेत् ॥ अथब्रह्मयज्ञः ॥ तस्यचका
लश्छंदोगपरिशिष्टोक्तोग्राह्यः ॥ सयथा ॥ सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः । वै
श्वदेवावसानेवानान्यत्रेतिनिमित्तकात् ॥ इति ॥ अथासनोपरिन्यस्तेषुप्रागग्रेषुस्व
स्तिकासनेनप्राङ्मुखउपविष्टःपाण्योर्मध्येसप्तपर्णंदर्भमादायदक्षिणोरौमुकुलीकृतमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलिंनिधायप्रणवव्याहृतिपूर्विकांगायत्रींजपित्वाऋष्याद्यनुसंधायइषेत्वेत्यादियथा
शक्तिब्रह्मयज्ञंकुर्यात ॥ इषेत्वेत्याद्यध्यायांतमनुवाकांतंवापठेत् ॥ अंतेचॐस्वस्तिइ
तिब्रूयात् ॥ ततउपग्रहव्यतिरिक्तदर्भानुदीच्यांदिशिप्रक्षिपेत् ॥ ततआचामेत् ॥
एवमेवप्रत्यहंब्रह्मयज्ञकरणेविधिः । कृष्णोऽस्याखरेष्ठइत्यादिचयथाशक्तितत्रपठेत् ।
अथवासंपूर्णब्रह्मयज्ञकरणाशक्तौमंत्राद्यकंडिकांपठित्वातिमार्कंडिकांपठेत्ततोब्राह्म
णाद्यांपठित्वांतिमांपठेतएवमुपर्युपर्यध्ययनेनार्थदृग्ग्रंथान्समापयेत् । अत्रशौनकः ।
स्वरवर्णलयोपेतमात्रास्थानक्रियान्वितम् । वेदमेवंपठेद्यस्तुस्वाध्यायफलमश्नुते ॥
ॐकारंव्याहृतीस्तिस्रोगायत्रींत्रिपदांतथा । मनसैवमनुस्मृत्यवेदादिकमुपक्रमेत् ॥
॥ इति ॥ ब्रह्मयज्ञाध्ययनस्यापूर्ववेदाध्ययनवदनध्यायदिनेषुत्यागप्रसक्तौमनुराह ।
वेदोपकरणेचैवस्वाध्यायेचैवनित्यके ॥ नानुरोधोऽस्त्यनध्यायेहोममंत्रेषुचैवहि ॥ नै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यकेनास्त्यनध्यायोब्रह्मसत्रंहितत्स्मृतम् ॥ इति ॥ श्रुतिरपि । तस्यवाएतस्ययज्ञस्य
द्वावनध्यायौयदात्माशुचिर्यद्देशइति । इति ॥ अत्रविशेषोगौतमेनोक्तः । अथयदिवा
तोवायात्स्तनयेद्वाविद्युत्पतेद्वावस्फूर्जेद्वाएकामृमेकंवायजुरेकंवासीमाभिव्याहरेद्भूर्भु
वःस्वःसत्यंतपःश्रद्धायांजुहोमीति । इति । अत्र । वातादिशब्दाअनध्यायोपलक्ष
णीभूताज्ञातव्याःअस्मात्प्रमाणादनध्यायेसत्यप्येकामेवर्चंपठेन्नाधिकंकिंचिदितिदा
ध्यन्यते । एवमुक्तविधिनाब्रह्मयज्ञंकृत्वातर्पणंकुर्यात् ॥ अथतर्पणम् ॥ ॥देशकालौसंकी
र्त्यममआत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंउत्सर्जनांगत्वेनदेवर्षिपितृतर्पणंक
रिष्ये ॥ इतिसंकल्प्य ॥ ततस्त्रीन्दर्भान्प्रागग्रान्दक्षिणपाणौगृहीत्वादेवानावाहयेत् ॥
विश्वेदेवासइतिगृत्समदऋषिर्विश्वेदेवादेवतागायत्रीच्छंदआवाहनेविनियोगः ॥ ॐ
विश्वेदेवासऽआगतश्रृणुतामऽइमꣳहवम् ॥ एदंबर्हिर्निषीदत ॥ विश्वेदेवाः श्रृणुतेममि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिसुहोत्रऋषिर्विश्वेदेवादेवतात्रिष्टुप्छंदःजपेविनियोगः ॥ ॐविश्वेदेवाःशृणुतेमꣳ
हवंमेयेऽअंतरिक्षेयऽउपद्यविष्ठ ॥ येअग्निजिव्हाउतवायजत्राआसद्यास्मिन्बर्हिषि
मादयध्वम् ॥ ततःसव्यकरान्वारब्धसकुशदक्षिणकरेणतोयंगृहीत्वाअक्षतांश्चगृही
त्वादेवतीर्थेन ॐकारपूर्वकंब्रह्मादिदेवांस्तर्पयेत् । उक्तंचपद्मपुराणेशारीरकदेवान्
ब्रह्मर्षीन्सर्वांस्तर्पयेदक्षतोदकैः ॥ तर्पयेच्चपितॄन्भक्त्यासतिलोदकचंदनैः ॥ इतियोगि
याज्ञवल्क्यः ॥ यद्युद्धृतंप्रसिंचेत्तुतिलान्संमिश्रयेज्जले ॥ अतोऽन्यथातुसव्येनतिलाग्रा
ह्याविचक्षणैः ॥ इति ॥ तर्पणप्रकारश्च ॥ ॐब्रह्मा तृप्यताम् । ॐविष्णुस्तृप्यताम् । ॐरु
द्रस्तृप्यताम् ॥ उदकोपस्पर्शः ॥ ॐप्रजापतिस्तृप्यतु ॐदेवास्तृप्यं० ॐछंदांसितृ
प्यं० ॐवेदास्तृप्यं० ॐऋषयस्तृप्यं० ॐपुराणाचार्यास्तृप्यं० ॐगंधर्वास्तृप्यं० ॐइ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तराचार्यास्तृप्यं० ॐसंवत्सरःसावयवस्तृप्यताम्॥ॐदेव्यस्तृप्यंताम्॥ अप्सरसस्तृप्यंताम्॥ ॐदेवानुगास्तृप्यंताम् । ॐनागास्तृप्यंताम् । ॐसागरास्तृप्यंताम् ॥ ॐपर्वतास्तृप्यंताम् ॥ ॐसरितस्तृप्यंताम् ॥ ॐमनुष्यास्तृप्यं० ॐयक्षास्तृप्यंताम् ॥ ॐरक्षांसितृप्यंताम् ॥ उदकोपस्पर्शः ॥ ॐपिशाचास्तृप्यंताम् । ॐसुपर्णास्तृप्यंताम् ॥ ॐभूतानितृप्यंताम् ॥ ॐपशवस्तृप्यंताम् ॥ वनस्पतयस्तृप्यंताम् ॥ ॐऔषधयस्तृप्यं० । भूतग्रामचतुर्विधस्तृप्यं० ॥ इतिप्रत्येकमेकेनचुलकेनतर्पयित्वोत्तराभिमुखोनिवीतीभूत्वांजलौतिरश्चः कुशानापश्चगृहीत्वाद्वौद्वावंजलीजलेन पूरितौदद्यात्॥ ॐसनकस्तृप्यता० । ॐसनन्दनस्तृप्यता० ॐसनातनस्तृप्यता० । ॐकपिलस्तृप्यता० । ॐआसुरीस्तृप्यता० ॐवोढुस्तृप्यता० । पंचशिखस्तृप्यताम्। एवंद्वौद्वावंजलीएकैकस्मैदत्त्वादक्षिणाभिमुखःप्राचीनावीतीसव्यंजान्वाच्यांगुष्ठेनति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लानादायदक्षिणेनपाणौगृहीत्वातानेवकुशान्दक्षिणमूलान्कृत्वाशंतस्त्वेत्यनयाकव्य
वाडनलादीनावाह्यायंतुनइतिजपित्वाकव्यवाडनलींदार्स्तर्पयेत्तदेवं । उशंतस्त्वेतिप्र
जापतिर्ऋषिः॥पितरोदेवताअनुष्टुप्छंदःआवाहनेविनियोगः।ॐउशंतस्त्वानिधीमह्यु
शंतःसमिधीमहि॥उशन्नुशतआवहपितॄन्हविषेअत्तवे॥ आयंतुनःइत्यस्यशंखऋषिः
पितरदेवतास्त्रिष्टुप्छंदःजपेविनियोगः ॥ ॐआयंतुनःपितरःसोम्यासोऽग्निष्वात्ताः
पथिभिर्देवयानैः॥अस्मिन्यज्ञेस्वधयामदंतोऽधिब्रुवंतुतेऽवन्वस्मान्॥ततोऽद्भिरंजलिं
प्रपूर्यपितृतीर्थेनांजलिंक्षिपेत् ॥ ॐकव्यवाडनलस्तृप्यताम् ३॥ ॐसोमस्तृप्यताम्
३॥ ॐयमस्तृप्यताम्३॥ अग्निष्वात्ताःपितरस्तृप्यंताम्३॥ सोमपाःपितरस्तृप्यंता
म्३॥ बर्हिषदःपितरस्तृप्यंताम्३ ॥ ॐयमायनमः १ ॐधर्मराजायनमः २

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐमृत्यवेनमः ३ ॐअंतकायनमः ४ ॐवैवस्वतायनमः ५ ॐकालायनमः ६ ॐसर्वभूतक्षयायनमः ७ ॐऔदुंबरायनमः ८ ॐदध्नायनमः ९ ॐनीलायनमः १० ॐपरमेष्ठिनेनमः ११ ॐवृकोदरायनमः १२ ॐचित्रायनमः १३ ॐचित्रगुप्तायनमः १४॥ ततःपितृतीर्थेनदक्षिणाभिमुखोद्विगुणीकृतेनदर्भेणतिलामिश्रितेनजलेन पित्रादिभ्यस्त्रींस्त्रीनंजलीन्दद्यात् ॥ अंजलीनियमस्तुव्यासवचनादनुसंधेयः। सयथा एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः ॥ अश्नंतिपितरस्त्रींस्त्रींस्त्रियस्त्वेकैकमंजलिम् ॥ ॥इति॥ अमुकगोत्रोऽस्मत्पिताअमुकशर्मातृप्यतामिदंजलंतस्मैस्वधाइत्येकांजलिंदत्त्वैवमपरमंजलिद्वयंदद्यात् । ततः अमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मातृप्यतामिदंजलंतस्मैस्वधा ३ ॥ अस्मत्प्रपितामहतृ० ३ ॥ ततः । उदीरतामंगिरसआयंतुनइतितिमृणांशंखःप्रजापतिऋषिःपितरोदेवतात्रिष्टुप्छंदः ॥ ऊर्जमित्यस्यप्रजापतिऋ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षिःपितरोदेवताविराट्छंदः ॥ येचेहेत्यस्यप्रजापत्यश्विसरस्वत्यऋषयःपितरोदेवता
स्त्रिष्टुप्छंदः॥ मधुवाताइतितिसृणांगौतमऋषिर्विश्वेदेवादेवतागायत्रीच्छंदः ॥ सर्वे
षांमंत्राणां प्रसेकाख्येकर्मणिविनियोगः ॥ ॐउदीरतामवरउत्परासउन्मध्यमाःपि
तरः सोम्यासः ॥असुंयईयुरवृकाऽऋतज्ञास्तेनोऽवंतुपितरोहवेषु ॥ ॐअंगिरसोनःपि
तरोनवग्वाअथर्वाणोभृगवःसोम्यासः ॥ तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमन
सेस्याम ॥ ॐआयंतुनःपितरःसोम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्य
ज्ञेस्वधयामदंतोधिब्रुवंतुतेऽवंत्वस्मान् ॥ ॐऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतं
म् ॥ स्वधास्थतर्पयतमापितॄन्॥ॐपितृभ्यःस्वधायिभ्यःस्वधानमः ॥ पितामहेभ्यः
स्वधायिभ्यःस्वधानमःप्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः अक्षन्पितरोमीम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्तापितरोतीतृपंतपितरःपितरःशुध्वंध्वम् ॥ ॐयेचेहपितरोयेचनेहयाँ२श्चविद्मयाँ२
उंचनप्रविद्म ॥ त्वंव्वेत्थयतितेजातवेदःस्वधाभिर्य्यज्ञःसुकृतंजुषस्व ॥ ॐमधुव्वाता
ऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ ॐमधुनक्तमुतोषसोमधुमत्पा
र्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ ॐमधुमान्नोव्वनस्पतिर्मधुमाँ२अस्तुसूर्य्यः ॥
माध्वीर्गावोभवन्तुनः॥तृप्यध्वंतृप्यध्वंतृप्यध्वं॥ इत्यंजलित्रयंपित्रादिभ्योदद्यात् ॥
ततोमातृतर्पणंकुर्यात् ॥अत्रव्यासोक्तःक्रमोवगंतव्यः । पितृभ्यःप्रथमंदद्यात्ततोमातृ
भ्यएवच । ततोमातामहानांचतत्पत्नीनांततोजलम् ॥ इति । मरीचिरपीममेवार्थंवि
विशेषयति ॥ अंतर्मातामहान्कृत्वामातृणांयः प्रयच्छति ॥ उदकंपिंडदानंचनरकंस
तुगच्छति ॥ इति अमुकगोत्रास्मन्माताअमुकीदेवीतृप्यतामिदंजलंतस्यैस्वधा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेवपुनर्द्विवारंदद्यात् ॥ अमुकगोत्रास्मत्पितामहीअमुकीदेवीतृप्यतामिदंजलंत
स्यैस्वधा ३॥ अमुकगोत्राअस्मत्प्रपितामहीअमुकीदेवीतृप्यतामिदंजलंतस्यैस्वधा
॥इतित्रिवारंजलंदद्यात्॥ अत्रवृद्धशातातपः मातृमुखाश्चयास्तिस्रस्तासांदद्याज्ज
लांजलीन् ॥ त्रींस्त्रीनेवतथान्यासांदद्यादेकैकमंजलिम् ॥ इत ॥ ततः नमोवइत्यष्टानां
प्रजापतिर्ऋषिःरसशोषजीवस्वधाघोरमन्युपितरोदेवताःपाठेविनियोगः ॥ ॐनमोवः
पितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोव
ःपितरोघोरायनमोवःपितरोमन्यवेनमोवःपितरःपितरोनमोवोगृहान्नः÷पितरोदत्तस
तोवः÷पितरोदेष्मैतद्वः÷पितरोवासः÷ ॥ इतिपठित्वा ॥ मातामहादींस्तर्पयेत् ॥ तद्य
था ॥ अमुकगोत्रोऽस्मन्मातामहोऽमुकशर्मातृप्यतामिदंजलंतस्मैस्वधा३ ॥ अमु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मातृप्यतामिदंजलंतस्मैस्वधा३ ॥ अमुकगोत्रोऽ
स्मद्वृद्धप्रमातामहोऽमुकशर्मातृप्यतामिदंजलंतस्मैस्वधा३ ॥ ततः । अमुकगोत्रा
स्मन्मातामहीअमुकीदेवीतृप्यतामिदंजलंतस्यैस्वधा ॥ इतित्रिवारंजलंदद्यात् ॥
ॐअमुकगोत्रास्मत्प्रमातामहीअमुकीदेवीतृप्यतामिदंजलंतस्यैस्वधा ३ ॥ अ
मुकगोत्रास्मद्वृद्धप्रमातामहीअमुकीदेवीतृप्यतामिदंजलंतस्यस्वधा ३ ॥ इतित्रिरं
जलीन्दद्यात ॥ ततआचार्यादीन्नामगोत्रस्वधाकारैस्तर्पयेत् ॥ आचार्यतत्पत्नीभार्या
पुत्रपितृव्यतत्पत्नीमातुलतत्पत्नीसुहृच्छिष्यांस्तर्पयेत् ॥ अमुकगोत्रोऽस्मद्गुरुरमु
कशर्मातृप्यतामिदंजलंतस्मैस्वधा ॥ अमुकगोत्रास्मद्गुरुपत्नीअमुकीदेवीतृप्यतामि
दंजलंतस्यैस्वधा ॥ एवंसर्वतर्पणंकर्तव्यम् ॥ ततः ॥ येबांधवाबांधवावायेन्यजन्म
निबांधवाः ॥ तेसर्वेतृप्तिमायांतुयेचास्मत्तोयकांक्षिणः ॥ येमकुलेलुप्तपिंडाः पुत्रदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रविवर्जिताः॥तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकम् ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृ
मानवाः ॥ तृप्यंतुपितरःसर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवा
सिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ इतिमंत्रैःपृथक्पृथक्सतिल
मुदकंदद्यात् ॥ इत्यवसानांजलिंदद्यात् ॥ ततःस्नानवस्त्रप्रांतंनिष्पीडयेत् ॥ अत्राहयो
गियाज्ञवल्क्यः ॥ वस्त्रनिष्पीडितंतोयंस्नातस्योच्छिष्टभागिनाम् ॥ भागधेयंश्रुतिः
प्राहतस्मान्निष्पीडयेज्जलम् ॥ इति ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृ
ताः ॥ तेगृण्हंतुमयादत्तंवस्त्रनिष्पीडनोदकम् ॥ एवंस्नानवस्त्रंनिष्पीड्यप्रागुद
ग्वातर्पणार्थंकुशान्परित्यज्ययज्ञोपवीतीभूत्वाचम्यजलेब्रह्मादिदेवानावाह्यवक्ष्यमा
णैस्तत्तल्लिंगमंत्रैर्यथासंभवोपचारैश्चंदनाक्षतपुष्पादिभिर्ब्रह्मादिवरुणांतानर्चयेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रमंत्राः ॥ ब्रह्मजज्ञानमितिप्रजापतिर्ऋषिरादित्योदेवतात्रिष्टुप्छंदः पूजनेवि
नियोगः ॥ ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्न्याऽ
उपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ब्रह्मणेनमः ॥ इदंविष्णुरिति
मेधातिथिऋषिर्विष्णुर्देवतागायत्रीच्छंदःपूजनेविनियोगः ॥ ॐइदंविष्णुर्विचक्र
मेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ विष्णवेनमः ॥ नमस्तइत्यस्य
परमेष्ठीऋषीरुद्रोदेवतागायत्रीछंदःपूजनेविनियोगः ॥ ॐनमस्तेरुद्रमन्यवउतोतइ
षवेनमः ॥ बाहुभ्यामुततेनमः ॥ रुद्रायनमः ॥ अपांस्पर्शः ॥ तत्सवितुरितिविश्वा
मित्रऋषिःसवितादेवतागायत्रीछंदःपूजनेविनियोगः ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ सवित्रेनमः ॥ मित्रस्येत्यस्यविश्वामित्रऋ
षिर्मित्रोदेवतागायत्रीच्छंदःपूजनेविनियोगः॥मित्रस्यचर्षणीधृतोवोदेवस्यसानसी ॥
द्युम्नंचित्रश्रवस्तमं ॥ मित्रायनमः ॥ इमंचइत्यस्यशुनःशेपऋषिर्वरुणोदेवता
गायत्रीछंदःपूजनेविनियोगः ॥ ॐइमंमेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराच
के॥ वरुणायनमः॥एवंब्रह्मादीनभ्यर्च्य ॥ अदृश्रमेत्यस्यप्रस्कण्वऋषिःसवितादेव
तागायत्रीच्छंदःसूर्योपस्थानेविनियोगः ॥ ॐअदृश्रमस्यकेतवोविरश्मयोजनाँ२अ
नु॥भ्राजंतोअग्नयोयथा ॥ उपयामगृहीतोऽसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसूर्य्याय
त्वाभ्राजाय ॥ सूर्यभ्राजिष्ठभ्राजिष्ठस्त्वंदेवेष्वसिभ्राजिष्ठोहंमनुष्येषुभूयासम् ॥ ६६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐहंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसद
ब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥ ततःसूर्यंप्रदक्षिणीकृत्यसूर्यायनमइतिनमस्कृ
त्यप्राच्यादिदिशस्तद्देवताश्चनमस्कुर्यात् ॥ ॐप्राच्यैदिशेइंद्रायनमः ॥ ॐआग्नेयैदि
शेअग्नयेनमः ॥ ॐदक्षिणायैदिशेयमायनम ॥ ॐनैर्ऋत्यैदिशेनिर्ऋतयेनमः ॥ ॐप्र
तीच्यैदिशेवरुणायनमः ॥ ॐवायव्यैदिशेवायवेनमः ॥ ॐउदीच्यैदिशेसोमायनमः॥
सइत्यस्यवामदेवऋषिःसवितादेवताअतिजगतीच्छंदः सूर्योपस्थानेविनियोगः ॥
ॐईशान्यैदिशेईश्वरायनमः ॥ ॐऊर्ध्वायैदिशेब्रम्हणेनमः ॥ ॐअवाच्यैदिशेअनंता
यनमः ॥ इतिनमस्कृत्योपविशेत् ॥ ततउदकांजलिंदद्यात् ॥ ॐब्रह्मणेनमः । ॐ
अग्नयेनमः । ॐपृथिव्यैनमः । ॐओषधीभ्योनमः । ॐवाचेनमः । ॐवाचस्पतये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमः । ॐविष्णवेनमः । ॐमहद्भ्योनमः । ॐअपांपतयेनमः । ॐवरुणायनमः ॥ एवमुदकंदत्त्वा ॥ संवर्चसेतिमंत्रस्यपरमेष्ठीऋषिस्त्वष्टादेवतात्रिष्टुप्छंदःमुखमार्जने विनियोगः ॥ ॐसंवर्चसापयसासंतनूभिरगंन्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्रो विदधातुरायोनुमार्ष्टुतन्वोयाद्विलिष्टम् ॥ इतिमुखंजलेनमाजयेत् ॥ देवागात्विति मंत्रस्यवाचस्पतिर्ऋषिर्वातोदेवताविराट्छंदःकर्मांगदेवताविसर्जनेविनियोगः ॥ ॐ देवागातुविदोगातुंवित्त्वागातुमित ॥ मनसस्पतऽइमंदेवयज्ञꣳस्वाहावातेधाः ॥ ए वंविधिनाजीवत्पितृकेणापिब्रह्मादिचित्रगुप्तपर्यंतंतर्पणंकृत्वास्वपित्रादितर्पणंवस्त्रनि ष्पीडनंचवर्जयित्वाब्रह्मार्चनादिस्नानादिकर्मांगभूतदेवताविसर्जनपर्यंतंतर्पणविधि र्विधेयः । नाजीवत्पितृकःकुर्याद्वस्त्रनिष्पीडनंबुधः ॥ नजीवत्पितृकःकुर्यात्कृष्णेस्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लैश्चतर्पणम् ॥ इतिलौगाक्षिवचनात् । वस्त्रनिष्पीडनंचपर्वादौनभाति । द्वादश्यांपंच
दश्यांसंक्रांतौश्राद्धवासरे । वस्त्रंनिष्पीडयेन्नैवनचक्षारणयोजयेत् ॥ इतिस्मृतेः
केचनतूत्तरऋषितर्पणविधानात्स्नानोत्तरतर्पणमध्येवस्त्रनिष्पीडनंनेच्छंति । यावद्दे
वानृषींश्चैवपितॄंश्चैवनतर्पयेत् ॥ तावन्नपिंडयेद्वस्त्रंयेनस्नातोनवोदके ॥ निष्पीडयाति
यःपूर्वंस्नानवस्त्रमतर्पिते ॥ निराशाः पितरोयांतिशापंदत्त्वासुदारुणम् ॥ इतियोगि
याज्ञवल्क्यस्मरणादनुचितंतर्पणात्प्राग्वस्त्रनिष्पीडनम् । वस्त्रनिष्पीडनंस्नानोत्तरत
र्पणमध्यएवकुर्यादितिहिश्रीदीक्षितकामदेवकृतोत्सर्गकारिकाटिप्पणेप्रतिपादितम् ।
केचित्स्नानकर्मांगभूतदेवनाविसर्जनमत्रनेच्छंतितदप्ययुक्तम् । किंतुस्नानविधेःक
र्मांगभूतत्वाद्विसर्जनस्यतद्देवताविषयत्वात्सविसर्गंस्नानविधिंसमापयदित्येवयुक्तमि
त्यपिश्रीदीक्षितकामदेवकृतोत्सर्गकारिकाटिप्पणेप्रतिपादितम् ॥ एवमुक्तविधिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यस्नानमाध्यान्हिकसंध्यातर्पणानिसमाप्यवक्ष्यमाणप्रकारेणारुंधती समेतान्गौ
तमादीन्सप्तर्षीन्सप्रवरान्स्थापयेत् ॥ ॥ ६ ॥ ॥ श्रीगणेशायनमः ॥ अथऋषिस्था
पन पूजनप्रकारःकथ्यतेसयथा तत्रकारिका कृत्वादर्भमयान्पीठेस्थापयेदृष्यरुन्धती
म् । प्रवरांश्चततोधीमान्कुर्यात्तेषांप्रतिष्ठितं॥ कारेकार्थः स्थापयेदृष्यरुन्धतीमित्य
त्रतत्रेत्यनुवर्त्ततेतस्मिन्कर्मणिअरुन्धतीमहितांसप्तऋषीन्सप्रवरांश्चकुशमयान्कृत्वा
स्थापयेत् ॥ यदाऋष्यरुन्धतीतिपाठस्तदासमाहारद्वन्द्वैकवद्भावः ततश्चनपुंस
कत्वादीकारस्यह्रस्वताचयदाऋष्यरुन्धतीमितिपाठस्तदाभावेक्तः ततः स्थापनो-
त्तरन्तेषांगोतमादीनांसप्तर्षीणांमनोजूतिरितिमन्त्रेणप्रतिष्ठांकुर्यादित्यर्थः तथाचरेणु
कारिकाप्रतिष्ठाप्यमनोजूतिमन्त्रंसमुच्चरन्इमावेवेतियजुषानामान्येषांविनिर्दिशेदि
तिकारिकार्थःस्थापनोत्तरंगोतमादिसप्तर्षीणामिमामेवेतियजुषांनाम संकीर्तयेदित्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थइमावेवेत्यत्रोक्ताएवपूजनीयाः गौतमादीनित्युदाहृतवाक्यात् । अथऋषिस्था
पनक्रमः कर्त्तापूर्वंत्रिभिस्त्रिभिर्दर्भपवित्रैः पृथक्पृथक्गायत्रीपठित्वाब्रह्म
ग्रन्थियुक्ता सप्तर्षिबटवःकार्यास्ततः पीठे नवंसदशंधौतवस्त्रंप्रसार्यतस्मिन्प्रागग्राः
स्थापनीयाःततआचम्य प्राणायामान्कृत्वाकुशकुसुमयवजलपाणिर्देशकालौसङ्की
र्त्याध्याथोत्सर्गकर्माङ्गत्वेनऋषिस्थापनपूजनमहंकरिष्ये । इतिसंकल्पंकुर्यात् ।
ततअक्षतान्गृहीत्वाॐभूर्भुवःस्वः गौतममावाहयामिस्थापयामिभोगोतमइहाग
च्छेहतिष्ठ ॐभूर्भुवःस्वःभारद्वाजमावाहयामिस्थापयामिभोभरद्वाजइहागच्छेहति
ष्ठॐभूर्भुवःस्वःविश्वामित्रमावाहयामिस्थापयामिभोविश्वामित्रइहागच्छेहतिष्ठ ॐ
भूर्भुवःस्वःजमदग्निमावाहयामिस्थापयामिभोजमदग्नेइहागच्छेहतिष्ठ ॐभूर्भुवःस्वः
वसिष्ठमावाहयामि स्थापयामिभोवसिष्ठइहागच्छेहतिष्ठॐभूर्भुवःस्वःकश्यपमावा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हयामिभोकश्यपइहागच्छेहतिष्ठ ॐभुर्भूवःस्वःअत्रिमावाहयामिस्थापयामिभोअत्रे
इहागच्छेहतिष्ठ ॐभूर्भुवःस्वःअरुन्धतीमावाहयामि स्थापयामिभोअरुंधातिइहाग
च्छेहतिष्ठ एवंसप्तऋषीनावाह्यस्थापयित्वाऽक्षतानादायमनोजूतिरितिमन्त्रेणप्रति
ष्ठांकुर्यात् ॥ ॐमनोजूतिरत्यस्यांगिसोबृह स्पतिर्ऋषिर्यजुर्विश्वेदेवादेवताऋषिस्था
पनेविनियोगः । ॐमनोजूतिर्जुषतामाज्जास्यबृहस्पतिर्य्यज्ञामिमन्तनोत्वरिष्टंयज्ञ ँ
समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोंइप्रतिष्ठ ॥ १ ॥ अरुन्धतीसहिताः
सप्तऋषयःसुप्रतिष्ठिताभवंत्वित्युच्चार्याक्षतान्प्रक्षिपेत् । एवंप्रतिष्ठाप्यसप्तर्षयइदं
विष्णुर्विचक्रमेइतिमन्त्राभ्यांषोडशोपचारैः सप्तऋषीनर्च्चयेत् ॥ तत्रकारिका अ
द्भिस्तान्स्नापयेद्विप्रान्सप्तऋषयइत्यृचा ॥ अर्घस्तेभ्यःप्रदातव्यःपूजनंचन्दनादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिः ॥ १ ॥ नैवेद्यैर्विविधैःपूजावेदस्यहितामिच्छता ॥ ऋषीणांप्रीतयेदद्या
दुपवीतान्यनेकशः ॥ २ ॥ प्रणम्यचमुनीन् भक्त्यातर्पणंच समारभेत् ॥ ३ ॥
कारिकार्थः अद्भिस्तानिति तीर्थोदकैस्तान्विष्णुरूपान् सप्तर्षीन् स्नापयेदि
त्यर्थः ॥ तथारेणुकारिका ॥मन्त्राभ्यांसप्तऋषयइदंविष्णुर्विचक्रमे ॥ अर्चयेद्विष्णुरू
पांस्तान्गन्धाद्यैः सोपवीतकैरिति ॥ अघस्तेभ्यइतिवेदस्थहितामिच्छतापुंसातेभ्यः
सप्तर्षिभ्यः ॥ अष्टांगोर्घःप्रदातव्यःगन्धादिभिरुपचारैस्तेपूज्याःबहुप्रकारैर्नैवेद्यैस्तेप्री
णनीयाः ऋषीणांप्रीतयेदद्यादितिऋषीणांप्रीत्यर्थंबहूनिब्रह्मसूत्राणिसमर्पयेदित्यर्थः
तथाचमदनरत्ने यज्ञोपवीतदानेनब्रह्मवर्चस्वीजायते ॥ तस्मात्तानिप्रदेयानिब्राह्मणे
भ्योविपश्चिता ॥ नन्दिपुराणे । यज्ञोपवीतदानेनसुरेभ्योब्राह्मणायवा । भवेद्विप्रश्चतु
र्वेदःशुद्धधीर्नात्रसंशयः ॥प्रणम्यातिप्रेम्णामुनीन्सप्तर्षीन्नमस्कृत्यपूजनोत्तरमृषींस्तर्प

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येदित्यर्थः ॥ अथऋषिपूजनक्रमः ॥ समाचारात्पूजनात्पूर्वकर्त्ता सप्तऋषयइदं
विष्णुर्विचक्रमइतिमन्त्राभ्यांकरादिमूर्द्धपर्यन्तंदेहन्यासान्न कुर्यात् तेयथा सप्तऋ
षयइत्यस्यादित्ययाज्ञवल्क्यावृषीसप्तऋषयो देवताजगतीछन्दःइदंविष्णुरित्यस्यमे
धातिथिर्ऋषिर्विष्णुर्देवताङ्गन्यासेविनियोगः ॥ ॐसप्तऽऋषयःप्रतिहिताःशरीरेस
प्तरक्षन्तिसदमपप्रयादम् ॥ सप्तापःस्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजोसत्रस
दौचदेवौ ॥ १ ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳ
सुरेस्वाहा ॥ २ ॥ इतिवामकरे ॥ ॐसप्तऋषयः ० ॐइदंविष्णुर्विचक्रमेत्रेधा
निदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ॥ दक्षिणकरे ॥ ॐसप्तऋषयः०इदंविष्णु
र्विचक्रमे०वामपादे ॥ ॐसप्तऋषयः०इदंविष्णु० दक्षिणपादे ॥ ॐसप्तऋषयः०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदंविष्णु॰वामजानौ ॥ ॐसप्तऋषयः॰इदंविष्णु॰दक्षिणजानौ ॥ ॐसप्तऋषयः॰इदंवि॰वामकट्याम् ॥ ॐसप्तऋषः॰इदंवि॰दक्षिणकट्याम् ॥ ॐसप्तऋषयः॰इदंविष्णुवि॰नाभौ ॥ ॐसप्तऋ॰इदंविष्णु॰हृदये ॥ ॐसप्त॰इदंवि॰कंठे ॥ ॐसप्तऋषयः॰इदंवि॰वामबाहौ ॥ ॐसप्तऋषयः॰इदंविष्णु॰ दक्षिणबाहौ ॥ ॐसप्तऋषः॰इदंवि॰मुखे ॥ ॐसप्तऋषः॰इदंवि॰नेत्रयोः ॥ ॐसप्तऋषय॰इदंवि॰मूर्ध्नि ॥ इतिस्वांगन्यासान्विधाय ॥ तथैवसप्तर्षिबटुपुन्यासान्कुर्यात् ॥ ततः सप्तऋषयइदंविष्णुर्विचक्रमेइतिमन्त्राभ्यांकाण्डानुसमयेनगौतमादीन्पूजयेत् तत्रैवंप्रयोगः गौतमायासनंसमर्पयामिएवंपाद्यमर्घ्यमाचमनीयस्नानयज्ञोपवीतादिस्तुतिपाठान्तंगौतमंसंपूज्यभरद्वाजादीन्पूजयेदेवमेवअथवापदार्थानुसमयेन गौत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादीन्पूजयेत्तत्रैवंप्रयोगः॥ ॥अथऋषिपूजनम्॥सप्तर्षीणांपूजनं च तथा स्थापनमष्ट
थक्॥ प्रतिष्ठावाहनंचैवकालज्ञानंतथैवच ॥ पूजोपवीतिदानंस्यात्प्राचीनावीतिपूर्वक
म् ॥ १ ॥ उत्सर्गःपितरश्चैवआचान्तोवंशएवच ॥ तत्सवितुरित्यारभ्यसावित्र्या
ब्रुवणंचतुः ॥ २ वीरतास्मइतिसकृदध्यायादीन्पठेत्तदा ॥ ३ ॥ तदेतदृचाभ्युक्तंनम
स्कारोविसर्जनम् ॥ समुद्रेतिजलेप्राश्यद्विराचान्तोगृहंव्रजेत् ॥ ४ ॥ द्यौःशान्तिरन्त
रिक्षꣳशान्तिः पृथिवीशान्तिः परापःशान्तिरोषधयःशांतिः ॥ वनस्पतयःशान्ति
र्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिः सामाशान्ति
रेधि ॥ १ ॥ यतोयतःसमीहसेततोनोऽअभयंकुरु ॥ शन्नःकुरुप्रजाभ्योभयन्नःप
शुभ्यः ॥ २ ॥ शान्तिपाठं पठन्तोऽपामार्गश्रितैस्त्रिभिर्दर्भपवित्रैःसप्तऋषीन् स्वप्रव

७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसंख्याकान्स्वऋषींश्चसावित्र्यादत्तब्रह्मग्रन्थीन्कुर्युः ॥ कश्यपोथभरद्वाजअंगि
रागौतमोमुनिः ॥ वत्सः पराशरश्चेतिमाण्डव्यः सप्तमस्तथा ॥ ततोवस्त्रंप्रसार्यतदुप
रिप्रागग्रानुदगग्रान्वासप्तर्षीन्स्थापयेत् ॥ अरुन्धतीसहितानितिकेचित् ॥ तथैव
स्वान्ऋषीन्गणानपिस्थापयेत ॥ अथप्रतिष्ठापनम् ॥ ॐभूर्भुवःस्वःकश्यपइहागच्छइ
हतिष्ठ ॥ कश्यपायनमःकश्यपंआवाहयामि ॥ ॐभूर्भुवःस्वः भरद्वाजइहा
गच्छइहतिष्ठ ॥ भरद्वाजायनमःभरद्वाजं आवाहयामि ॥ ॐभूर्भुवःअंगिरःइ
हागच्छइहतिष्ठ ॥ अंगिरसेनमः अंगिरसिआवाहयाम ॥ ॐभूर्भुवःस्वःगौतमइ
हागच्छइहतिष्ठ ॥ गौतमायनमः गौतमंआवाहयामि ॥ ॐभूर्भुवःस्वः वत्सइहा
गच्छइहतिष्ठ ॥ वत्सायनमःवत्संआवाहयामि ॥ ॐभूर्भुवःस्वः पराशरइहागच्छइह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिष्ठ ॥ पराशरायनमःपराशरंआवाहयामि ॥ ॐभूर्भुवःस्वःमाण्डव्यइहागच्छइहति
ष्ठ ॥ माण्डव्यायनमःमाण्डव्यंआवाहयामि ॥ ॐभूर्भुवःस्वःअरुन्धतिइहागच्छइह
तिष्ठ ॥ अरुन्धत्यैनमः अरुन्धतींआवाहयामि ॥ ॐमनोजूतिर्ज्जुषतामाज्यंस्यबृह
स्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामों ३ प्र
तिष्ठि ॥ १ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्तेसवमेवप्रतिष्ठितम्भव
ति ॥ २ ॥ अरुन्धतीसहितसप्तर्षिस्वर्षयःसुप्प्रतिष्ठितावरदाभवन्तु ॥ सप्तऽ
ऋषयःप्रतिहिताःशरीरेसप्तरक्षन्तिसदमप्रमादम् ॥ सप्तापःस्वपतोलोकमीयुस्त
त्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ३ ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपद
म् ॥ समूढमस्यपाꣳसुरे० ॥ इमावेवगौतमभरद्वाजावयमेवगौतमोऽयंभरद्वाज

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमावेवविश्वामित्रजमदग्नीऽ अयमेवविश्वामित्रोयंजमदग्निरिमावेववसिष्ठकश्यपाव
यमेववसिष्ठोयं कश्यपोवागेवात्रिर्वाचाह्यंनमद्यतेतिर्हवैनामैतद्यदत्रिरिति सर्वस्यात्ता
भवतिसर्वमस्यान्नंभवतियऽएवंवेद ॥ १ ॥ इतिमन्त्रेणसर्वैःप्रार्थनाकार्या ऋषीन्वि
ष्णुस्वरूपान्ध्यात्वा ॥ ततःसर्वेआचम्य त्रिस्त्रिःप्राणानायम्य देशकालौसङ्कीर्त्य
अध्यायोत्सर्गोपाकर्म्माङ्गभूतंऋषिपूनमहंकरिष्ये इतिआसनादिविधाय ॥
सुवर्णघटितंद्रव्यंनानारत्नसमन्वितम् ॥ आसनंरुचिरंयच्चगृह्यतांभोमुनीश्वराः ॥
सप्तऋषिभ्योनमः अथवाअरुन्धत्यासहसप्तऋषिभ्यःस्वर्षिभ्योनमः इदमासनंस-
मर्पयामि ॥ गङ्गाजलंसमानीतंगन्धद्रव्येणसंयुतं ॥ पाद्यार्घ्यंप्रतिगृण्हन्तुकश्यपा
द्यामहर्षयः ॥ अरुं०पाद्यंस० ॥ सुवर्णपात्रसंयुक्तंगन्धपुष्पाक्षतैर्युतम् ॥ सप्तर्षयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रगृण्हन्तुअर्घ्यंदत्तंमयाकृतं ॥ अरुं०अर्घ्यंसमर्पयामि ॥ कर्पूरवासितंतोयंसुवर्ण
कलशेस्थितम् ॥ दत्तमाचमनीयंचऋषीणांप्रीतयेसदा ॥ अरुं०आचमनीयंस० ॥
ततःमधुपर्कंसमर्पयामि ॥ पञ्चामृतमंत्रैःपञ्चामृतंसमर्पयामि ॥ आपोहिष्ठेतिशुद्धो
दकस्नानं ॥ सुगन्धद्रव्यसंयुक्तंपवित्रंमण्डलंजलं ॥ स्नानार्थंवःसमानीतंमुनयःप्रति
गृह्यताम् अरुं०इदंस्नानीयंस० ॥ सूक्ष्माण्यतीवशुभ्राणिवस्त्राणिविविधानिच ॥
ऋषयःप्रतिगृण्हन्तुअग्निधौतोत्तरीयकैः ॥ अरुं० वस्त्रंस० ॥ नानामन्त्रैःसमुद्भू
तंकार्पासंब्रह्मसूत्रकं ॥ प्रत्येकंदीयतेस्वच्छमृषयः प्रतिगृह्यताम् ॥ अरुंध०
ऋषिभ्यःप्रत्येकमिदंयज्ञोपवीतंसम० ॥ आत्मसन्तापहारंचसुगंधद्रव्यसंयुतं ॥
चंदनंतत्प्रयच्छामिऋषीणांप्रीतयेसदा ॥ अरुं०चंदनंस० ॥ शुभ्रतंदुलजाःशुभ्राःशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वशुभ्रामनोरमाः ॥ अक्षतार्थंप्रयच्छामितान्गृण्हन्तुमुनीश्वराः ॥ अरुं० अक्षतान्स
म० ॥ शतपत्रंजातिपुष्पंमल्लिकाकुसुमंतथा ॥ पूजार्थंवोमयाभक्त्यामुनीनांविदुषां
सदा ॥ अरुं० पुष्पाणिसम० ॥ तुलसीपत्राणिबिल्वपत्राणिचसमर्पयामि ॥ कृष्णागरु
र्गुग्गुलोयंसुगन्धश्चदशाङ्गकः ॥ धूपोयंकश्यपादिभ्योदीयतेप्रीतयेधुना ॥ अरुं० धू
पंस० ॥ पद्मवर्त्तिसमायुक्तंसर्वमंगलशोभनम् ॥ दत्तंनीराजनंतेभ्योदीपोऽयंप्रतिगृह्य
ताम् ॥ अरुं० दीपंस० ॥ स्वादून्यन्नानिसर्वाणिसदिव्यव्यञ्जनानिच ॥ शर्कराघृतसं
युक्तंनैवेद्यंदीयतेमया ॥ अरुं० नैवेद्यंस० ॥ ऊष्णोदकंशुद्धिकरंक्षालितंकृतमुत्तमम् ॥
गृण्हन्तुमुनयः सर्वेप्रीयेयान्तुमेसदा ॥ अरुं० इदमाचमनीयंस० ॥ नारिकेलंचकूष्मा
ण्डंकदलीकर्कटीफलम् ॥ ऋतुदेशोद्भवंचान्यंदीयतेद्यमुनीश्वराः ॥ अरुं० फलंस० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मयुक्तताम्बूलंप्रतिगृह्यताम् ॥ अरुं०

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूगीफलंसकर्पूरंनागवल्लीदलैर्युतम् ॥ कर्पूररससंयुक्तताम्बूलंप्रतिगृह्यताम् ॥ अरुं०
ताम्बूलंस० ॥ अरुं०हिरण्यदक्षिणांस० ॥ ब्रह्मिष्ठाब्रह्मरूपाश्चकश्यपाद्यामहर्षयः॥ ब्र
ह्मप्रज्ञादिदातारःसन्तुमेकीर्तिकर्माणि॥अरुंध०नीरांजनदीपंस० ॥ यज्ञेनयज्ञेतिमंत्रपु
ष्पाञ्जलिंसमर्पयामि ॥ अरुंधत्यासहकश्यपादिऋषिभ्यःस्वर्षिभ्यश्चेदमनुलेपनं ॥ ए
ताः सुमनसएषधूपइयंज्योतिरिदंनैवेद्यमिदमाच्छादनमिमानियज्ञोपवीतानिअमृत
रूपेणस्वाहासम्पद्यन्ताम् ॥ कश्यपादिपूजनविधेर्न्यूनातिरिक्तोयोविधिःससर्वःपरि
पूर्णोऽस्तु॥सर्वेसुप्रसन्नावरदाभवन्तु ॥ ततःस्वपितृभ्योयज्ञोपवीतानिदद्यात् ॥ प्राची
नावीती ॥ दक्षिणाभिमुखोभूत्वासर्वेकुशोदकंगृहीत्वापुरतोयज्ञोपवीतानिनिधाय ॥
अ०गो०भ्यःअस्म०पि०पि०महेभ्यःतथाद्वि०गो० भ्यःअस्म० मा० म० प्र० म०वृ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमा० महेभ्यःअन्येभ्यः कव्यवाडनलादिदिव्यपितृभ्यइमानियज्ञोपवीतानिस्वाहा सम्पद्यन्तांस्वधासम्पद्यन्तामितिवा ॥ जीवत्पितृकैरपिपितुःपित्रादिभ्योमातामहादिभ्योयज्ञोपवीतानिदेयानि ॥ ततःसयंकृत्वासर्वेषांब्राह्मणानांगन्धादिदक्षिणापर्यन्तं दत्त्वातेभ्योयज्ञोपवीतानिदद्युः ॥ अस्मिन्कालेयज्ञोपवीतधारणंसर्वैःकर्त्तव्यम् ॥ तदुक्तं ॥ उपाकर्मेसूतकान्तेचातुर्मास्येगतेपिवा ॥ नवंयज्ञोपवीतंचधारयेज्जीर्णंकंत्यजेत् ॥ अन्यच्च । उपाकर्मणिचोत्सर्गेगतेमासचतुष्टये ॥ नवयज्ञोपवीतानिधृत्वा पूर्वाणिसंत्यजेत् ॥ पूर्वयज्ञोपवीतानिशिरोमार्गेणानिःसार्यउदकेप्रक्षेपः ॥ जीर्णयज्ञोपवीतानिशिरोमार्गेणसंत्यजेदिति संग्रहोक्तेः ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्याद्यपुण्यतिथौममश्रौतस्मार्तकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंनूतनय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञोपवीतधारणमहंकरिष्ये ॥ तदङ्गत्वेनयज्ञोपवीताभिमन्त्रणंकरिष्ये ॥ यज्ञोप
वीतंहस्ताभ्यांगृहीत्वागायत्र्यासकृदाभिमन्त्र्य ॥ ब्रह्मजज्ञानमितिसकृत आपोहिष्ठे
तितिसृभिः पुनन्तुमेतिनवभिर्मार्जनम् ॥ पवित्रेस्थो वैष्णव्यौइतिपठित्वा ॥ ॐ
तत्सवितुरादिना ॐकारंप्रथमतन्तुंन्यसामि ॥ ॐअग्निंद्वितीयतन्तुंन्यसामि ॥
ॐनागान्तृतीयतन्तुंन्यसामि ॥ ॐसोमंचतुर्थ० ॥ ॐपितृनपञ्चमतं० ॥ ॐ
प्रजापतिंषष्ठतं०॥ ॐवायुंसप्तमतं० ॥ ॐसूर्यंअष्टमतं० ॥ ॐविश्वान्देवान्नवम ॥
ॐयजुर्वेदंप्रथमदोरकन्यं० ॥ ॐऋग्वेदंद्वितीयदो० ॥ ॐसामवेदंतृतीयदो०॥ ॐ
अथर्ववेदंग्रथिन्य०॥ ग्रन्थौब्रह्मविष्णुमहेश्वरेभ्योनमः ॥ उद्वयंतमितिसूर्यायदर्शयेत
त्रिस्ताडनम् ॥ दशगायत्र्याभिमन्त्र्य ॥ यज्ञोपवीतमितिमन्त्रस्यपरमेष्ठिऋषिः
त्रिष्टुप्छन्दःलिङ्गोक्तादेवतायज्ञोपवीतधारणेविनियोगः ॥ ॐयज्ञोपवीतंपरमंपवित्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥
यज्ञोपवीतमसियज्ञस्यत्त्वायज्ञोपवीतेनोपनह्यामिइतिपृथक्पृथक्मन्त्रेणधृत्वाआच
मनंकुर्यात् ॥ एवंद्वितीयंतृतीयमपिधार्यं ॥ यज्ञोपवीतंयादिजीर्णभूतंवेदान्तनित्यंप
रब्रह्मसूत्रम् ॥ आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतञ्चविसर्जनीयम् ॥ यज्ञोपवीते
द्वेधार्येश्रौते स्मार्तेचकर्मणि ॥ तृतीयमुत्तरीयार्थंवस्त्राभावेचतुर्थकम् ॥ अथपूर्वतर्पणं
कुशैः सऋषितर्पणकुशानेकीकृत्याचम्य ।णानायम्यदेशकालौसङ्कीर्त्य ॥ अन
ध्यायादिषुअशुचित्वेनअनधिकारिभिः शूद्रादिभिःश्रूयमाणत्वेनकृतस्याध्ययन
स्यमालिन्यस्यापसर्गनिवृत्तयेयजुर्वेदांतर्गतमाध्यन्दिनशाखाध्यायिनश्छन्दसामु
त्सर्गाख्यतर्पणंकरिष्यामहे ॥ इतिसंकल्पः ॥ गौतमायपाद्यं एवंभरद्वाजादिभ्यउ
पचाराः ततः समाचारात्स्वस्वप्रवरान्पञ्चोपचारैः पूजयेत । ततःसप्तऋषींस्तर्पयेत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रगृह्यसूत्रं अद्भिर्देवांश्छन्दाꣳसिवेदानृषीन्पुराणाचार्यान्गन्धर्वानितराचार्यान्सं
वत्सरंचसावयवंपितॄनाचार्यानिति सूत्रार्थः ॥शिष्यगणैःसहाचार्योदेवादींस्तर्पयेत् ॥
तथाचकारिका ॥ देवांश्छंदांसिवेदांश्चसनातनानृषींस्तथा ॥ तथापुराणाचार्यांश्चग
न्धर्वानितरांस्तथा ॥६॥ अहोरात्रार्द्धमासांश्चमासानृतूंस्तथैवच ॥ संवत्सरंसावयवं
स्वान्पितॄंस्तर्पयेदथ ॥ ७ ॥ आचार्यतर्पणैःसार्द्धमयम्पुरश्चपञ्चाभिः ॥ मन्त्रैर्द्वाभ्यां
चमूर्द्धेतिमातृकास्त्रितयेनच ॥ ८ ॥ एवंषोडशभिर्मन्त्रैःसप्तऋषयएकया ॥ चतुर्भि
स्तर्पयेदंशैरिमावेवेत्यनेनचेति ॥ ॥ कारिकार्थः ॥ ॥ देवानितिआचार्यशिष्यादे
वांश्छन्दांसीत्यादिनापितॄनाचार्यानित्यंतान् सूत्रोक्तदेवांस्तर्पयेयुरित्यर्थः ॥ अथ
तिसूत्रोक्तदेवतातर्पणानन्तरमयंपुरइत्यादिमामेवेत्यंतेनयजुषामन्त्रोक्तदेवतास्तर्प
येयुरित्यर्थः ॥ ॥ तथाच कात्यायनः ॥ ॥ गौतमादीनृषीन्सप्तकृत्वादर्भमयान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः।पूजयित्वाविधानेनतर्पयेदृचमुच्चरन्निति॥ ऋग्ग्रहणंयजुरादीनामप्युपलक्षणार्थं
अतएवकारिकाकारेणमाच्छंदइत्यादीनियजूंष्युक्तानिआचार्य।शिष्याः स्वपित्रादीं
स्तर्पयेयुः तत्रसूत्रंस्वांश्चतर्पयेयुरितितथाचकारिकास्वान्पितॄंस्तर्पयेदथेतिअथेत्यन
न्तरंसूत्रविहिततर्पणानन्तरमित्यर्थः आचार्यतर्पणैःसार्द्धमितिदेवादितर्पणैःसहाचा
र्यतर्पयेत्तनपूर्वतर्पणवत्पितृतर्पणोत्तरामित्यर्थः ततआचार्यशिष्याअयंपुरइत्यादिप
ञ्चभिमूर्द्धेत्यादिद्वाभ्यांमाच्छंदइत्यादित्रिभिरेवश्छन्दइत्यादिषोडशभिः सप्तऋषय
इत्येकयाअव्वदृशःसमानमासांजीवीत्यादिचतुर्भिर्वंशपाठैरिमावेवेत्येकेनयजुषादेव
तीर्थेनऋषींस्तर्पयेयुःततःस्वपित्रादित्रींस्तर्पयेयुः जीवत्पितृकेनदेवाद्याचार्यतर्पणा
न्तंतर्पणंकर्त्तव्यंततः पितृतर्पणंविहायमन्त्रोक्तदेवांस्तर्पयेत ॥ अथऋषितर्पणक्रमः
कृतऋजुकुशोपग्रहाआचार्यशिष्यादेवतीर्थेनापोगृहीत्वाऋषींस्तर्पयेयुः ॐदेवास्तृ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्यंतांआचार्यास्तृप्यन्तांततः प्राचीनावीतीभूत्वादक्षिणाग्रान्कुशान्भृत्वाञ्जलिनापो
गृहीत्वातिलानप्राक्षिप्यदक्षिणमुखेनापितृतीर्थेननामगोत्रोच्चारणपूर्वकंब्रह्मयज्ञांगतर्प
णविधिनापित्रादींस्तर्पयेयुःजीवत्पितृकास्तुआप्रकोष्ठात्कृतापसव्यास्तिलमिश्राभि
रद्भिराचार्यस्यपित्रादींस्तर्पयेयुस्तत्रैवंप्रकारःगोत्राआचार्यपितरस्तृप्यध्वंस्वधेति प्र
योगःततोयज्ञोपवीतीभूत्वायंपुरश्चेत्यादिमन्त्रैर्मन्त्रोक्तदेवतास्तर्पयेयुःतर्पणप्रकारःक
र्तापाणौकुशतिलजलान्यादायगोत्राअस्मत्पितृपितामहप्रपितामहा देवदत्तयज्ञदत्त
विष्णुदत्तशर्माणःतृप्यध्वंस्वधाएवंमात्रादिभ्यःमातामहादिभ्योदद्युः अथऋषितर्पणं
अयंपुरआदिपंचानांसाध्याऋषयोयजूंषिप्राणभृतोदेवताःमूर्द्धादिद्वयोर्देवाऋषयो य
जूंषिलिङ्गोक्तादेवताःएवश्छन्दअादिषोडशानांपरमेष्ठिऋषिर्यजूंषिलिङ्गोक्तादेवताऋ
षितर्पणेविनियो ॥सप्तऋषयइत्यस्यादित्ययाज्ञवल्क्यावृषीसप्तऋषयोदेवताजगती

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छन्दः ऋषितर्पणेविनियोगः ॐ अयंपुरोभुवस्तस्यंप्राणोभौवायनो व्वसन्तंप्राणाय
नोगायत्रीव्वासन्तीगायत्र्यैगायत्रङ्गायत्रादुपा७ंशुरुपा७ंशोस्त्रिवृत्त्रिवृतोरथन्तरँव्व
सिष्ठऽऋषिः प्रजापतिगृहीतयात्वयाप्राणङ्गृण्हामिप्रजाभ्यः ॥१॥ अयंदक्षिणाव्विश्वकं
र्म्मातस्यमनोव्वैश्वकर्मणङ्ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मीत्त्रिष्टुभः स्वार७ंस्वारादन्तर्य्या
मोंतर्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृहीतयात्वयामनोगृण्हामि
प्रजाभ्यः ।२। अयंपश्चात्॥ अयंपश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंव्वर्षाश्चाक्षुक्ष्यो
जगतीवार्षीजगत्याऽऋक्समऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपंजमदग्निर्ऋ
षिः प्रजापतिगृहीतयात्वयाचक्षुर्गृण्हामिप्रजाभ्यः ।३। इदमुत्तरात्स्वस्तस्यश्रोत्रंसौव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरच्छौस्यनुष्टुप्शारद्यनुष्टुभंऽऐडमैडान्मन्थीमन्थिनएकविंशऽएकविंशाद्वैराजंवि
श्वामित्रऋषिः प्रजापतिगृहीतयात्वयाश्रोत्रंगृण्हामिप्रजाभ्यः ॥४॥ इयमुपरिमतिस्त
स्यैवाङ्गमात्याहेमन्तोवाच्यःपङ्क्तिर्हैमन्तीपंक्तयेनिधनंवन्निधनंवतऽआग्रयणऽ आ
ग्रयणत्रिणवत्रयस्त्रिंठ्शौत्रिणवत्रयस्त्रिंठ्शाभ्यांऽशाक्ररैवतेविश्वकर्मऽऋषिः प्रजा
पतिगृहीतयात्वयाव्वाचंगृण्हामिप्रजाभ्योलोकन्ताऽइन्द्रम् ॥५॥ लोकम्पृणाच्छिद्रम्पृ
णाथोसीदध्रुवात्वम् ॥ इन्द्राग्नीत्वाबृहस्पतिरस्मिन्योनावसीषदन् ॥६॥ताअस्यसूदंदो
हसंसोमंऽश्रीणानितपृश्न्नयः ॥ ज मन्देवानाविशास्त्रिष्वारोचनेदिवः ॥ ७ ॥ इन्द्र
विश्वाऽअवीवृधन्त्समुद्रव्यचसाङ्गिरः ॥ रथीतमंठ्रथीनाव्वाजानाऽंसत्पतिम्पति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्॥८॥मूर्द्धाव्वयः प्रजापतिच्छन्दः क्षत्रव्वयोमयन्दश्छन्दोविष्टम्भो व्वयोधिपतिश्छ
न्दोविश्वकर्म्माव्वयः परमेष्ठीच्छन्दोबस्तोव्वपोविवलश्छंदोव्वृष्णिर्व्वयोविशाल
श्छंदःपुरुषोव्वयस्तद्रश्छन्दोव्याघ्रोव्वयोनाधृष्टश्छन्दः सिंठ होव्वयश्छदिश्छन्दः प
ष्ठवाड्वयोबृहतच्छन्दउक्षाव्वयः ककुप्छन्दऽऋषभोव्वयः सतोबृहतीच्छंदोनड्वान्व
यः॥९॥अनड्वान्वयः पंक्तिच्छन्दोधेनुर्व्वयोजगतीच्छन्दस्त्यविर्व्वयस्त्रिष्टुप्छदोदित्य
वाड्वयोविराट्छंदःपञ्चाविर्व्वयोगायत्रीच्छन्दस्त्रिवत्सोव्वयऽउष्णिक्छन्दस्तुर्य्यवा
ड्वयौनुष्टुप्छन्दोलोकन्ताऽइन्द्रम्॥१०॥माच्छन्दः प्रमाच्छन्दः प्रतिमाच्छन्दोऽआस्त्री
न्वयश्छन्दः पंक्तिच्छन्दऽउष्णिक्छन्दोबृहस्पतीच्छन्दोनुष्टुप्छन्दोविराट्छन्दोगाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः ॥११॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दः
समाश्छन्दोनक्षत्राणिच्छन्दोव्वाक्छन्दोमनश्छन्दः कृषिश्छन्दोहिरण्यञ्छन्दो गौ
श्छन्दोजाच्छन्दोश्वच्छन्दः ॥१२॥ अग्निर्देवताव्वातोदेवतासूर्योदेवताचन्द्रमादेवता
व्वसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदे
वतान्वरुणोदेवता ॥१३॥ एवश्छन्दोव्वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽआच्छ
श्छन्दोमनश्छन्दोव्यचश्छन्दःसिन्धुछश्छन्दः समुद्रश्छदःसरिरञ्छन्दःककुप्छन्दस्त्रि
ककुप्छन्दः काव्यश्छन्दोऽअंकुपञ्छन्दोक्षरपंक्तिश्छन्दः पदपंक्तिच्छन्दोव्विष्टारप
क्तिच्छन्दः क्षुरोभ्रजश्छन्दऽआच्छच्छन्दः ॥ १४ ॥ आच्छच्छन्दः प्रच्छच्छ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्दः संयच्छंन्दोव्वियच्छान्दोबृहच्छन्दोरथन्तरञ्छन्दोनिकायश्छन्दो व्विवधश्छ
न्दोगिरश्छन्दोभ्रजश्छन्दः सꣳस्तुपछन्दोनुष्टुप्छन्दऽएवश्छन्दोव्वरिवश्छन्दोव्वय
श्छन्दोव्वयस्कृच्छन्दोव्विष्पद्राश्छन्दोविशालञ्छन्दश्छदिश्छन्दोदूरोहणं छन्दस्त
न्द्रञ्छन्दोऽअङ्गाङ्गञ्छन्दः ॥ १५ ॥ रश्मिनासत्यायसत्यञ्जिन्नवप्रतिनाधर्म्मणा
धर्मञ्जिन्वान्वित्यादिवादिवञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्रतिधिनापृथिव्यापृ
थिवीञ्जिन्वव्विष्टम्भेन वृष्ट्यावृष्टिञ्जिन्वप्रवयान्हाहर्ज्जिन्वानुया रात्र्यारात्रीञ्जिन्वोशि
जाव्वसुभ्योव्वसूञ्जिन्वप्प्रकेतेनादित्येभ्यऽआदित्याञ्जिन्वतंतुनारायः ॥ १६ ॥ तंतु
नारायस्पोषेण रायस्पोषञ्जिन्वसठ्.सर्प्पेणश्रुतायं श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्ज्जि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वोत्तमेनतनूभिस्तनूर्जिन्द्वव्वयोधसाधीतेनाधीतञ्जिन्वाभिजितातेजसातेजोजिन्द्व
॥ १७ ॥ प्रतिपदसिप्प्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसिसम्पदेत्वातेजोसितेजसे
त्वात्रिवृदसि ॥ १८ ॥ त्रिवृदसित्रिवृतेत्त्वाप्रवृदसिप्प्रवृतेत्वाव्विवृदसि विवृते
त्त्वासवृदसिसवृतेत्त्वाक्रमोस्याक्रमायत्वासंक्रमोसिसंक्रमाय त्त्वोत्क्रमोस्युत्क्रमाय
त्वोत्क्रान्तिरस्युत्क्रान्त्यैत्त्वाधिपतिनोर्ज्योर्ज्जज्जिन्द्व ॥ १९ ॥ राइयसिप्प्राची
दिग्वसवस्तेदेवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्ता त्रिवृत्त्वास्तोमः पृथिव्याश्रय
त्त्वाज्ज्यमुक्थमव्यथायैस्तभ्नातुरथन्तरठंसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा
प्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्ताचायमधिपतिश्चतेत्त्वासर्व्वस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥ २० ॥ व्विराडसिदक्षिणा
दिग्रुद्रास्तेदेवाऽअधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याᳬश्र
यतुप्रऽउगमुक्थमव्यथायैस्तभ्नातुबृहत्सामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्र
थमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदा
नानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥ २१ ॥ सम्राडसिप्रतीचीदिगा
दित्यास्तेदेवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वा स्तोमः पृथिव्याᳬ
श्रयतुमरुत्वतीयमुक्थमव्यथायैस्तभ्नातुव्वैरूपर्ठसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋ
षयस्त्वाप्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ॥ २२ ॥ स्वराडुस्यु
दीचीदिङ्मरुतस्तेदेवाऽअधिपतयःसोमोहेतीनाम्प्रतिधर्त्तैकविंठ·शस्त्वा स्तोमः÷पृथि
व्याᳬश्रयतुनिष्केवल्यमुक्थमव्यथायैस्तन्भातुव्वैराजठं·सामप्प्रतिष्ठित्या ऽअन्त
रिक्षऽऋषयस्त्वाप्प्रथमजादेवेपुदिवोमात्त्रंयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ता चायमधिप
तिश्चतेत्त्वासर्व्वेसम्व्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ॥२३॥अधि
पत्क्यसिबृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृहस्पतिर्हेतीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिᳬ
शौत्त्वास्तोमौपृथिव्याᳬश्रयतांवैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायैस्तभ्नीताᳬशा
कररैवतेसामनीप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेपुदिवोमात्त्रंयाव्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिम्णा।प्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासव्वेर्वसंव्विदानाकस्यपृष्ठेस्वर्गेलोके य
जमानञ्चसादयन्तु ॥ २४ ॥ अयम्पुरोहरिकेशःसूर्यरश्मिस्तस्यरथगृत्सश्चरथौजा
श्चसेनानीग्रामण्यौ ॥ पुञ्जिकस्थलाचक्रतुस्थलाचाप्सरसौदङ्क्षणव÷पशवोहेतिः
पौरुषेयोव्वधःप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वे
ष्टितमेषाञ्जम्भेदध्मः ॥ २५ ॥ अयन्दक्षिणाव्विश्वकर्म्मातस्यरथंष्वनश्चरथंचित्र
श्चसेनानीग्रामण्यौ ॥ मेनकाचसहजन्याचाप्सरसौयातुधानाहेतीरक्षाꣳसिप्प्रहेति
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे दध्मः
॥ २६ ॥ अयम्पश्चाद्विश्वव्यचास्तस्यरथंप्रोतश्चासमरथश्चसेनानीग्रामण्यौ ॥ प्रम्लो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चन्तीचानुम्लोचन्तीचाप्सरसौव्याघ्राहेतिःसर्पाःप्रहेतिस्तेभ्यो नमोऽअस्तुतेनोवन्तु
तेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ २७ ॥ अयमुत्तरात्संयद्वसु
स्तस्यताक्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौ ॥ विश्वाचीचघृताचीचाप्सरसावापोहे
तिर्व्वातःप्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनो द्वेष्टित
मेषाञ्जम्भेदध्मः ॥ २८ ॥ अयमुपर्य्यर्व्वाग्वसुस्तस्यसेनाजिच्चसुषेणश्चसेनानीग्राम
ण्यौ ॥ उर्वशीचपूर्व्वचित्तिश्चाप्सरसावस्फूर्ज्जन्हेतिर्विद्युत्प्रहेतिस्तेभ्योनमोऽअ
स्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ २९ ॥ मन्त्रो
क्ताऋषयस्तृप्यन्ताम् ॥ ॐअथवक्षःसमानमासाञ्जीवीपुत्रात्साञ्जीवीपुत्त्रोमा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सोमाहित्थेर्माहित्थिर्वा
मकक्षायणाद्वामकक्षायणोव्वात्स्याद्वात्स्यःशाण्डिल्याच्छाण्डिल्यःकुश्रेःकुश्रिर्यज्ञव
चसोराजस्तंबायनाद्यज्ञवचाराजस्तंबायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः
प्रजापतिर्ब्रह्मणोब्रह्मस्वयम्भुब्रह्मणेनमः ॥ १ ॥ वंशोक्ताऋषयस्तृप्यन्ताम् ॥ १ ॥
अथव्वंशस्तादिदंवयंशौर्पणाय्याच्छौर्पणाय्योगौतमाद्गौतमोव्वात्स्याद्वात्स्योव्वा
त्स्याच्चपाराशर्य्याच्चपाराशर्य्यःसांकृत्याच्चभारद्वाजाच्चभारद्वाज औदवाहेश्चशाण्डि
ल्याच्चशाण्डिल्योबैजवापाच्चगौतमाच्चगौतमोबैजवापायनाच्चव्वैष्टपुरेयाच्चव्वैष्टपुरेय
ःशाण्डिल्याच्चरौहिणायनाच्चरौहिणायनःशौनकाच्चात्रेयाच्चरैभ्याच्चरैभ्यःपौतिमा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्यायणाच्चकौण्डिन्यायनाच्चकौण्डिन्यायनं कौण्डिन्यात्कौण्डिन्यं कौण्डिन्या
त्कौण्डिन्यंकौण्डिन्याच्चाग्निवेश्याच्च ॥ २ ॥ आग्निवेश्यःसैतवात्सैतवं
पाराशर्यात्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुरा
यणाच्चगौतमाच्चगौतमोभारद्वाजाद्भारद्वाजोवैजवापायनाद्वैजवापायनंकौशिका
यनेःकौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पारा
शर्य्यात्पाराशर्योजातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुराय
णाच्चयास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वा
जाद्भारद्वाजऽआत्रेयात् ॥ ३ ॥ आत्रेयोमाण्टेर्माण्टिर्गौतमाद्गौतमोगौतमाद्गौत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोव्वात्स्याद्वात्स्यꣳशाण्डिल्याच्छांडिल्यꣳकैशोर्यात्काप्यात्कैशोर्यꣳकाप्यꣳ कुमार
हारितात्कुमारहारितोगालवाद्गालवोव्विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्योव्वत्सन
पातोबाभ्रवाद्वत्सनपाद्बाभ्रव ꣳ पथ ꣳ सौभरात्पन्था ꣳ सौभरोऽयास्यादाङ्गिरसादया
स्यऽआङ्गिरसआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रोव्विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोश्वि
भ्यामश्विनौदधीचऽआथर्वणाद्दध्यङ्ङाथर्व्वणोदैवोमृत्योꣳ प्राध्वꣳसनान्मृत्युः प्रा
ध्वꣳसनꣳ प्रध्वꣳसनात्प्रध्वꣳसन एकर्षेरेकर्षिर्व्विप्राजित्तेर्विप्राजित्तिर्व्यष्टेर्व्यष्टिꣳ
सनारोꣳ सनारुꣳ सनातनात्सनातनꣳ सनगात्सनगꣳ परमेष्ठिनꣳ परमेष्ठीब्रह्मस्वयं
भुब्रह्मणेनमः ॥ वंशोक्ताऋषयस्तृप्यन्ताम् ॥ ४ ॥ अथव्वꣳशस्तदिदꣳव्वयꣳशौ
र्पणाय्याच्छौर्पणाय्योगौतमाद्गौतमोव्वात्स्याद्वात्स्योव्वात्स्याच्चपाराशर्याच्चपा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राशर्य्यं साकृत्याच्च भारद्वाजाच्च भारद्वाजऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो
बैजवापाच्च गौतमाच्च गौतमो बैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयं शाण्डिल्याच्च रौहि
हिणायनाच्च रौहिणायनं शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यं पौतिमाष्यायणाच्च कौ
ण्डिन्यायनाच्च कौण्डिन्यायनं कौण्डिन्याभ्यां कौडिन्यऽऔर्णवाभेभ्यऽऔर्णवाभाः
कौण्डिन्यात्कौण्डिन्यं कौत्डिन्यात्कौण्डिन्यं कौण्डिन्याच्चाग्निवेश्याच्च ॥ ९ ॥
आग्निवेश्यं सैतवात्सैतवं पाराशर्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजा
द्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गोतमाच्च गौतमो भारद्वाजाद्भारद्वाजो बलाका
कौशिकः बलाहकीकाषायणात्काषायणं सौकरायणात्सौकरायणस्त्रैवणस्त्रैवणिरौप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्धनेरौपजंधनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायानिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्य्योजातूकर्ण्याज्जातूकर्ण्योभारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुरायणाच्चयास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ६ ॥ आत्रेयादात्रेयोमाण्टेर्माण्टिर्गौतमाद्गौतमोगौतमाद्गौतमोव्वात्स्याद्वात्स्यःशाण्डिल्याच्छाण्डिल्यःकैशोर्यात्काप्यात्कैशोर्यःकाप्यःकुमारहारितात्कुमारहारितोगालवाद्गालवोव्विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्योव्वात्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवःपथः सौभरात्पन्थाः सौभरोयास्यादांगिरसादयास्यआङ्गिरसआभूतेस्त्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्ट्रादाभूतिस्त्वाष्ट्रोव्विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोश्विभ्यामाश्विनौदधीचऽआथर्व्व
णाद्दध्यङ्ङाथर्वाणोऽथर्वाणोदैवादथर्व्वादैवोमृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः
प्रध्वꣳसनात्प्रध्वꣳसनऽएकर्षेरेकर्षिर्व्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्याष्टिःसनारोःस्नारुःस
नातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठीब्रह्मणोब्रह्मस्वयंभुवेब्रह्मणेन
मः॥७॥वंशोक्ताऋषयस्तृप्यन्ताम् ॥ अथर्व्वꣳशस्तादिदंवयंभारद्वाजीपुत्राद्भारद्वाजी
पुत्रोव्वात्सीमांडवीपुत्राद्वात्सीमांडवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रोगार्गीपुत्राद्गा
र्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौंडिनीपुत्रोगार्गीपुत्राद्गार्गीपुत्रोगार्गीपु
त्राद्गार्गीपुत्रोबाडेयीपुत्राद्बाडेयीपुत्रोमौषिकीपुत्रान्मौषिकीपुत्रोहारिकर्णीपुत्राद्धारि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्णीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैंगीपुत्रः शौनकीपुत्राच्छौनकी
पुत्रः ॥ ८ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्या माठरीपुत्रःकौ
त्सीपुत्रात्कौत्सीपुत्रोबौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालंकायनीपुत्रोव्वा
र्षगणीपुत्राद्वार्षगणीपुत्रोगौतमीपुत्राद्गौतमीपुत्रआत्रेयीपुत्रादात्रेयीपुत्रोगौतमीपुत्रा
द्गौतमीपुत्रोव्वात्सीपुत्राद्वात्सीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पारा
शरीपुत्रोव्वार्कारुणीपुत्राद्वार्कारुणीपुत्रआर्तभागीपुत्रादार्तभागीपुत्रःशौङ्गीपुत्राच्छौ
ङ्गीपुत्रःसांकृतीपुत्रात्सांकृतीपुत्रः॥९॥आलम्बीपुत्रादालम्बीपुत्रआलम्बायनीपुत्रादा
लंबायनीपुत्रोजायन्तीपुत्राज्जायन्तीपुत्रोमांडुकायनीपुत्रान्माण्डूकायनीपुत्रोमां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ड्डकीपुत्रान्मांडूकीपुत्रःशांडीलीपुत्राच्छाण्डिलीपुत्रोराथीतरीपुत्राद्राथीतरीपुत्रः कौ
ञ्चिकीपुत्राभ्यांकौञ्चिकीपुत्रोबैदभृतीपुत्राद्बैदभृतीपुत्रोभालुकीपुत्राद्भालुकीपुत्रःप्रा
चीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्श
केयीपुत्रः ॥ १० ॥ प्राश्नीपुत्रादासुरिवासिनःप्राश्नीपुत्रआसुरायणादासुरायण
आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालाकोरुणादरुणउपवेशेरुपवेशिः
कुश्रे कुश्रिर्व्वाजश्रवसोव्वाजश्रवाज्जिह्वावतोबाध्योगाज्जिह्वावान्बाध्योगोसिता
द्वार्षगणादसितोव्वार्षगणोहरितात्कश्यपाद्धरितःकश्यपःशिल्पात्कश्यपाच्छिल्पः
कश्यपःकश्यपान्नैद्ध्रुवेःकश्यपोनैद्ध्रुविर्व्वाचोव्वागम्भिण्याअंभिण्यादित्यादादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यानिमानिशुक्लानियजूꣳषिव्वाजसनेयेनयाज्ञयल्क्येनाख्यायन्ते ॥४॥ वंशोक्तार्ऋ
षयस्तृप्यन्तां॥ इमावेवगोतमभरद्वाजावयमेवगोतमोयं भारद्वाजइमावेव्विश्वामित्र
जमदग्नीअयमेवव्विश्वामित्रोयं जमदग्निरिमावेवव्वसिष्ठकश्यपावयमेवव्वसिष्ठोयंक
श्यपोव्वागेवात्रिर्व्वाशाह्यन्नमद्यतेतिर्हवैनामैतद्यदात्रिरितिसर्व्वस्यात्ताभवति सर्व्वम
न्नम्भवतियएवँवेद ॥ १ ॥ ब्राह्मणोक्तार्ऋषयस्तृप्यन्ताम् ॥ आचार्यशिष्याअयंपुर
इत्यादीमावेवेत्यन्तैर्मन्त्रब्राह्मणैस्तर्पणंसमापयेयुरिति ॥ पौषमासस्यरोहिण्यामि
त्यत्रप्रयोगावसरेवासुदेवप्रभृतिनिबंधकाराजीवत्पितृकस्यमातामहादितर्पणंलिखि
तवंतस्तदसमञ्जसम् ॥ वस्तुतस्तुयद्वत्पित्रादितर्पणेजीवत्पितृकस्यनाधिकारः
प्रतीयतेतद्वन्मातामहादितर्पणेप्यनधिकारएव पित्र्यञ्जीवत्पितुर्नोक्तमितिनिगमवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्यात् ॥ नपित्र्यञ्जीवत्पितृकःप्रकुर्वीतकदाचनेतिवृद्धगार्ग्यमपि कात्यायनः सपि
तुःपितृकृत्येषुअधिकारोनविद्यते ॥ नजीवन्तमतिक्रम्यकिञ्चिद्दद्यादितिश्रुतिःपितृ
कृत्यानिश्राद्धतर्पणस्वधाकारपितृतृप्त्यर्थंदानानीतिव्याख्यातं जीवत्पितृकसञ्चये
तथाअन्यांश्चेतरइतिस्वसूत्रेपिमृतपितृकस्यैवपित्रादितर्पणंसूत्रकारेणप्रदर्शितं ॥ म
हानदीषुसर्वासुतीर्थेषुचनदेषुच । जीवत्पितापिकुर्वीतश्राद्धंपार्वणधर्मवत्इतिवत्प्र
तिप्रसवोप्यत्रास्तेयत्रप्रतिप्रसवस्तत्रभवति ॥ यथाजीवत्पितापिकुर्वीततर्पणंयमभी
ष्मयोरितिअन्येविशेषाअत्रजीवत्पितृकनिर्णयेसन्तिपरन्तुग्रन्थगौरवभयान्नलिखि
ताः ॥ एवंऋषितर्पणंविधायाचार्याशिष्या ॐकारव्याहृतिपूर्वासावित्रींचतुःपठेयुः
तत्रसूत्रंसावित्रींचतुरनुद्रुत्येतिसूत्रार्थःसाचार्याःसावित्रींचतुःपठेयुः उत्सर्गसूत्रेसावि
त्रींचतुरनुद्रुत्येतिल्यबन्तनिर्देशेनसावित्रीपठनाव्यवहितकालेविरताः स्मेतिपठनंय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्यपिप्राप्तंतथाप्युत्तरसूत्रेप्रवचनंचपूर्ववदित्युक्तेस्तत्रयथाप्रवचनंदृष्टंतथात्रकर्तव्यंते
नसावित्रीपठनानन्तरमेवाध्यायादीन्प्रब्रूयुस्तदन्तेविरताःस्मइतिपठेयुरितिसिद्धंवि
रतोत्तरंपठनाभावात् ॥ तथाचकारिका ॥ शिष्याःपठेयुःसावित्रींचतुष्कृत्वोगुरुः
स्वयं ॥ उपाकृतिवन्मंत्रांश्चप्रणवंयोजयेत्कविः ॥ १० ॥ सावित्रींत्रिःसमुच्चार्यह्य
ध्यायांश्चप्रपाठकान ॥ शतस्थानान्यनुस्मृत्यकण्डिकाश्चतथान्तिमाः ॥ ११ ॥
अन्तिमाःफक्किकाब्रूयादग्निमीलेपुरोहितम् ॥ इषेत्यग्नआयाहिशन्नोदेवीरभिष्टये॥१२॥
सहनोस्त्विवतिमन्त्रञ्चपश्चादुभाकबीतिच ॥ ऋषिश्राद्धंततःकृत्वाब्राह्मणानांविस
र्जनं ॥ १३ ॥ कारिकार्थः । प्राङ्मुखोगुरुःस्वयम् ॐकारपूर्विकांसावित्रींचतुःपठेत॥
प्रत्यङ्मुखोपविष्टाः शिष्यास्तद्वत्पठेयुः । सावित्रीपठनोत्तरमध्यायप्रपाठकशतांत्य
कंडिकांत्यफक्किकाप्रतीकानिपठेयुः । नत्वाचारमूलंप्रतीकपठनं ॥ किन्त्वध्यायादी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्प्रब्रूयादीति सूत्रेआदिशब्दस्यप्रतीकोपादानंव्याख्यातृभिर्व्याख्यातं ॥ युगपत्स
र्ववेदोत्सर्गपक्षेऋग्वेदोक्तान्यृषिमुखानिसामवेदोक्तानिपर्वाण्यथर्ववेदोक्तानिसूत्राणि
पठेयुः ॥ तत्रसूत्रं ॥ क्षपणंप्रवचनंचपूर्ववत् ॥ सूत्रार्थः ॥ प्रवचनमध्यायादि
पठनंक्षपणमनध्ययनंपूर्ववत् ॥ उपाकर्मवदित्यर्थः ॥ अथाध्ययनक्रमः ॥
प्राङ्मुखोपविष्टोगुरुः ॥ ॐकारपूर्वांसावित्रींत्रिःपठित्वाप्रत्यङ्मुखोपविष्टशिष्ये
भ्योमन्त्रब्राह्मणयोरध्यायादीन्पाठयेत् ॥ शिष्यायथोक्तमध्यायादीनधीयीरन् ॥
ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यं ॥ अथसंहिताध्यायप्रतीकं ॥ इषेत्वा ॥ १ ॥ कृ
ष्णोसि ॥ २ ॥ समिधाग्निम् ॥ ३ ॥ एदम् ॥ ४ ॥ अग्नेस्तनूः ॥ ५ ॥ देवस्य
त्वा ॥ ६ ॥ वाचस्पतये ॥ ७ ॥ उपयामगृहीतोसि ॥ ८ ॥ देवसवितः ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपोदेवाः ॥ १० ॥ युञ्जानःप्रथमम् ॥ ११ ॥ दृशानोरुक्मः ॥ १२ ॥ मयिगृह्णा
मि ॥ १३ ॥ दध्रुवक्षितिदर्ध्रुवेयानिः ॥ १४ ॥ अग्नेजातान् ॥ १५ ॥ नमस्ते ॥१६॥
अश्मन्नूर्जम् ॥ १७ ॥ व्वाजश्च ॥ १८ ॥ स्वाद्वीन्त्वा ॥ १९ ॥ क्षत्रस्ययो
निः ॥ २० ॥ इमम्मे ॥ २१ ॥ तेजोसि ॥ २२ ॥ हिरण्यगर्भःसम् ॥ २३ ॥
अश्वस्तूपरः ॥ २४ ॥ शादन्दङ्क्षिः ॥ २५ ॥ अग्निश्च ॥ २६ ॥ समास्त्वा ॥ २७ ॥
होतायक्षत् ॥ २८ ॥ समिद्धोऽअञ्जन् ॥ २९ ॥ देवसवितः ॥ ३० ॥ सहस्रशीर्षा
पुरुषः ॥ ३१ ॥ तदेव ॥ ३२ ॥ अस्याजरासः ॥ ३३ ॥ यज्जाग्रतः ॥ ३४ ॥ अपे
तः ॥ ३५ ॥ ऋचव्वचिम् ॥ ३६ ॥ देवस्यत्वा ॥३७॥ देवस्यत्वा ॥ ३८ ॥ स्वाहा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणेभ्यः ॥ ३९ ॥ ईशाव्वास्यम् ॥ ४० ॥ इतिसंहिताध्यायाः ॥ क्वचित्पुस्तकेअध्यायोक्ताऋषयस्तृप्यंतामित्यपिपाठोदृश्यतेसत्याज्यएव ॥ मत्कृतपद्धतौद्रष्टव्यं ॥ परतद्धुरपरं ॥ अथशतानि ॥ इषेत्वा ॥ १ ॥ परिते ॥ २ ॥ अग्नेनय ॥ ३ ॥ उपयामगृहीतोसिसुशर्म्मासि ॥ ४ ॥ सोमस्यत्विषिः ॥ ५ ॥ परस्याऽअधि ॥ ६ ॥ अन्यावः ॥ ७ ॥ राज्ञ्यसि ॥ ८ ॥ नमोहिरण्यबाहवे ॥ ९ ॥ इन्द्रेमम् ॥ १० ॥ इमौते ॥ ११ ॥ अन्नात्परिस्रुतः ॥ १२ ॥ अश्विनातेजसा ॥ १३ ॥ पृथिव्यैस्वाहा ॥ १४ ॥ प्रजापतयेच ॥ १५ ॥ तऽअस्य ॥ १६ ॥ तनूनपात्पथः ॥ १७ ॥ अयामिह ॥ १८ ॥ अनुनः ॥ १९ ॥ इयत्यग्रे ॥ हिरण्मयेन ॥ शेषंपञ्चसप्ततिः ॥७५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्डिकाः ॥ व्रतमुपैष्यन् ॥ १ ॥ सवैकपालान्येवान्यतरउपदधाति ॥ २ ॥ सवै
स्रुचःसंमार्ष्टि ॥ ३ ॥ हिङ्कृत्यान्वाह ॥ ४ ॥ सवैप्रवरायाश्रावयाति ॥ ५ ॥ ऋतवो
हवैदेवेषुयज्ञेभागमीषिरे ॥ ६ ॥ सवैपर्णशाखयाव्वर्त्मानपाकरोति ॥ ७ ॥ मनवेह
वैप्रातः ॥ ८ ॥ सयत्राह ॥ ९ ॥ सयद्वाइतश्चेतश्चसम्भराति ॥ १० ॥ उद्धृत्याहवनी
यम्पूर्णाहुतिंजुहोति ॥ ११ ॥सूर्योहवाअग्निहोत्रम् ॥ १२ ॥ ॥अथहुतेग्निहोत्रउप
तिष्ठते ॥ १३ ॥ प्रजापतिर्हवाइदमग्रएकएवास ॥ १४ ॥ महाहविषाहवैदेवावृत्रञ्ज
घ्नुः ॥ १५ ॥ देवयजनञ्जोषयन्ते ॥ १६ ॥ दक्षिणेनावहनीयंप्राचीनग्रीवेकृष्णाजिने
उपस्तृणाति ॥१७॥ सप्तपदान्यनुनिक्रामाति ॥१८॥ शिरोवैयज्ञस्यातिथ्यंबाहूप्रायणी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योदयनीयौ ॥१९॥ तद्यएषपूर्वार्ध्योव्वर्षिष्ठस्थूणाराजोभवति ॥ २० ॥ उदरमेवास्यमदः ॥२१॥ अभ्रिमादत्ते ॥२२॥ तद्यत्रैतत्प्रवृत्तोहोताहोतृषदनउपविशति ॥२३॥ प्रजापतिर्वैप्रजाःसमृजानोरिरिचानइमामन्यत ॥२४॥ प्राणोहवाऽअस्योपाꣳशुः ॥ २५ ॥ चक्षुषीहवाअस्यशुक्रामन्थिनौ ॥ २६ ॥ भक्षयित्वासमुपहूताःस्यइत्युक्त्वोत्तिष्ठति ॥ २७ ॥ मनोहवाअस्यसविता ॥२८॥ आदित्येनचरुणोदयनीयेनप्रचरति ॥२९॥ प्रजापतिर्व्वाएषयदꣳशुः ॥३०॥ देवाश्चवाऽअसुराश्च ॥३१॥ अथस्रुवश्चाज्यविलापनींचादाय ॥ ३२ ॥ अरण्योरग्नीसमारोह्य ॥ ३३ ॥ केशवस्यपुरुषस्य ॥ ३४ ॥ आग्नेयोष्टाकपालःपुरोडाशोभवति ॥ ३५ ॥ असद्वाइदमग्रआसीत् ॥ ३६ ॥ प्रजापतिराग्नि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपाण्यभ्यध्यायत् ॥ ३७ ॥ एतद्वैदेवाअब्रुवन् ॥ ३८ ॥ अथैनमतःखनत्येव ॥ ३९ ॥
पर्णकषायानिष्पक्काएताआपोभवन्ति ॥ ४० ॥ भूयाᳬसिहवीᳬवीषिभवन्ति ॥ ४१ ॥
रुक्मम्प्रतिमुच्यबिभर्ति ॥ ४२ ॥ व्वनीबाह्येताग्निबिभ्रदित्याहुः ॥ ४३ ॥ गार्हपत्यंचे
ष्यन्नपलाशशाखयाव्युदूहति ॥ ४४ ॥ अथातोनैर्ऋतीर्हरन्ति॥४५॥चितोगार्हपत्यो
भवति ॥ ४६ ॥ आत्मन्नग्निंगृह्णीतेचेष्यन् ॥ ४७ ॥ कूर्म्ममुपदधाति ॥ ४८ ॥ प्राणभृत
उपदधाति ॥ ४९ ॥ द्वितीयांचितिमुपदधाति ॥ ५० ॥ तृतीयांचितिमुपदधाति ॥ ५१ ॥
चतुर्थीञ्चितिमुपदधाति ॥ ५२ ॥ पञ्चमींचितिमुपदधाति ॥ ५३ ॥ नाकसदउपदधा
ति ॥ ५४ ॥ ऋतव्याउपदधाति ॥ ५५ ॥ अथातःशतरुद्रियंजुहोति ॥ ५६ ॥ उपवसथीवे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हन् प्रातरुदितआदित्ये ॥५७॥ अथातोऽवैश्वानरंजुहोति ॥५८॥ अथातोराष्ट्रभृतोजु
होति ॥५९॥ अथातःपयोव्रततायै ॥६०॥ अग्निरेषपुरस्ताच्चीतये ॥६१॥ प्रजापतिः
स्वर्गंलोकमजिगाꣳसत्॥६२॥ प्राणोगायत्री ॥६३॥ प्रजापतिंत्रिवृस्तम् ॥६४॥तस्य
वाएतस्याग्नेः ॥६५॥ अथहैतेरुणे॥६६॥सँवत्सरोवैयज्ञःप्रजापतिः॥६७॥त्रिर्हवैपुरुषो
जायते ॥६८॥ त्रयोघवाऽएतस्याग्निहोत्रस्याग्निहोत्री ॥६९॥ उद्दालकोहारुणिः॥७०॥
उर्वशीहाप्सराः ॥७१॥ भृगुर्हवैवारुणिः ॥७२॥ पशुबन्धेनयजते ॥७३॥ वद्ययाह
वै ॥७४॥ अयंवैयज्ञोयोयंपवते ॥ ७५ ॥ समुद्रँवाऽएतेप्रतरन्ति ॥ ७६ ॥ यद्दालो
के ॥७७॥ दीर्घसत्रꣳहवाऽएतऽउपयन्ति ॥७८॥ तदाहुर्यदेषदीर्घसत्री ॥७९॥ सो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोवैराजायज्ञःप्रजापतिः ॥ ८० ॥ विश्वरूँपवेत्वाष्ट्रमिन्द्रोहन् ॥ ८१ ॥ इन्द्रस्यवैय
त्र ॥ ८२ ॥ एतस्माद्वैयज्ञात्पुरुषोजायते ॥ ८३ ॥ ब्रह्मौदनंपचाति ॥ ८४ ॥ प्रजाप
तिर्देवेभ्योयज्ञान्व्यादिशत् ॥ ८५ ॥ प्रजापतेरक्ष्यश्वयत् ॥ ८६ ॥ प्रजापतिरकाम
यत ॥ ८७ ॥ अथप्रातर्गोतमस्य ॥ ८८ ॥ पुरुषोहनारायणोकामयत् ॥ ८९ ॥ ब्रह्म
वैस्वयम्भुतपोतप्यत ॥ ९० ॥ अथास्मैश्मशानंकुर्वन्ति ॥ ९१ ॥ देवाहवैसत्रंनिषे
दुः ॥ ९२ ॥ अथातोरौहिणोजुहोति ॥ ९३ ॥ सवैतृतीयेहन् ॥ ९४ ॥ द्वयाहप्राजाप
त्याः ॥ ९५ ॥ दृप्तबालाकिर्हानुचानोगार्ग्यआस ॥ ९६ ॥ जनकोहवैदेहः ॥ ९७ ॥
जनकꣳहवैदेहंयाज्ञवल्क्योजगाम ॥ ९८ ॥ पूर्णमदःपूर्णमिदम् ॥ ९९ ॥ श्वेतकेतुर्ह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाआरुणेयः ॥ १०० ॥ इतिब्राह्मणाध्यायः ॥ १ ॥ क्वचित्पुस्तकेचतुर्दशकांडेषडध्या
योक्ताऋषयस्तृप्यंतामित्यपिपाठोदृश्यते ॥ अथप्रपाठकाः ॥ व्रतमुपैष्यन् ॥ १ ॥
चतुर्द्धाविहितोहवाअग्रेग्निरास ॥ २ ॥ तेवाआर्द्राःस्युः ॥ ३ ॥ सस्रुचोत्तरमाघारमाघार
यिष्यन् ॥ ४ ॥ यज्ञेनवैदेवाः ॥ ५ ॥ यज्ञेनवैदेवादिवमुपोदक्रामन् ॥ ६ ॥ सवैस्रुचौव्यूह
ति ॥ ७ ॥ सयद्वाइतश्चेतश्चसम्भरति ॥ ८ ॥ व्वरुणोहैनꣳराज्यकामआदधे ॥ ९ ॥ यत्रवै
प्रजापतिःप्रजाःससृजे ॥ १० ॥ प्रजापतिर्हवाएतेनाग्नेयेनयज्ञेनेजे ॥ ११ ॥ महाहविषाहवै
देवाव्वृत्रजघ्नुः ॥ १२ ॥ देवयजनंजोषयन्ते ॥ १३ ॥ व्वाचंयच्छति ॥ १४ ॥ नीडेकृष्णाजि
नमास्तृणाति ॥ १५ ॥ तद्यएषपूर्वार्ध्योव्वर्षिष्ठस्थूणराजोभवति ॥ १६ ॥ व्विजामानोहैवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यधिष्ण्याः॥१७॥पाशेकृत्वाप्रतिमुञ्चति॥१८॥सोत्युपयजति॥१९॥प्राणोहवाअस्यो
पाᳬशुः॥२०॥आत्माहवाअस्याग्रयणः ॥ २१ ॥ घ्नन्तिवाएतद्यज्ञम् ॥ २२ ॥ सवाअ
वभृथमभ्यवैति ॥ २३ ॥ तद्यत्रैतद्द्वादशाहेनव्यूढच्छन्दसायजते ॥ २४ ॥ देवाश्च
वाअसुराश्च ॥२५॥ बार्हस्पत्येनचरुणाप्रचरति ॥२६॥ सवाअपःसम्भरति ॥ २७ ॥
मैत्रावरुण्यापयस्ययाप्रचरति ॥ २८ ॥ असद्वाइदमग्रआसीत् ॥ २९ ॥ प्राजापत्य
ञ्चरङ्काआलम्भते ॥३०॥ प्रतीप्राएतेग्नयोभवन्ति ॥ ३१ ॥ तस्याएतस्याआषाढां
पूर्वांकरोति ॥ ३२ ॥ स्रुक्मंप्रतिमुञ्चाबिभर्ति ॥ ३३ ॥ गार्हपत्यञ्चेष्यन्पलाशशाख
याव्युद्वहति ॥ ३४ ॥ अथदर्भस्तम्बमुपदधाति ॥ ३५ ॥ आत्मन्नग्निंगृह्णीतेचेष्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न् ॥ ३६ ॥ कूर्ममुपदधाति ॥ ३७ ॥ प्राणभृतउपदधाति ॥ ३८ ॥ अथविश्वज्यो
तिषमुपदधाति ॥ ३९ ॥ अथातोन्वावृतम् ॥ ४० ॥ गार्हपत्यमुपदधाति ॥ ४१ ॥
अथातःशतरुद्रियंजुहोति ॥ ४२ ॥ प्रत्येत्याग्निंप्रहरिष्यन् ॥ ४३ ॥ अथैतान्यज्ञक्र
तूञ्जुहोति ॥ ४४ ॥ अथप्रातःप्रातरनुवाकमुपाकरिष्यन् ॥ ४५ ॥ अग्निरेषपुरस्ता
च्चीयते ॥ ४६ ॥ अथातश्चयनस्यैव ॥ ४७ ॥ सम्वत्सरोवैप्रजापतिरग्निः ॥ ४८ ॥ ने
ववाइदमग्रेऽसदासीन्नेवसदासीत् ॥ ४९ ॥ सम्वत्सरोवैयज्ञःप्रजापतिः ॥ ५० ॥ अ
पिहवाएतर्हि ॥ ५१ ॥ प्रजापतिर्वैप्रजाःसृजमान्येतप्यत ॥ ५२ ॥ अथातःस्वाध्या
यप्रशठंसा ॥ ५३ ॥ अयंवैयज्ञोयोयंपवते ॥ ५४ ॥ पुरुषठंहनारायणंप्रजापतिरुवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च ॥ ५५ ॥ सोमोवैराजायज्ञःप्रजापतिः ॥ ५६ ॥ प्रजापतिर्यज्ञमसृजत ॥ ५७ ॥
ब्रह्मौदनंपचति ॥ ५८ ॥ नियुक्तेषुपशुषु ॥ ५९ ॥ प्रमुच्याश्वंदक्षिणेनव्वेदिम् ॥६०॥
पुरुषोहनारायणोकामयत॥ ६१ ॥ देवाहवैसत्रन्निषेदुः ॥ ६२ ॥सयत्रैताᳬहोतान्वा
ह ॥ ६३ ॥ द्वयाहप्राजापत्याः ॥ ६४ ॥ दृप्तबालाकिर्हानुचानोगार्ग्यआस ॥ ६५ ॥
अथहैनंभुज्युर्लौह्यायानिःपप्रच्छ ॥६६॥ जनकंहव्वैदेहंयाज्ञवल्क्योजगाम ॥ ६७॥
भूमिरंतरिक्षंद्यौरिति ॥६८॥ इतिचतुर्दशकांडोक्ताःप्रपाठकाः ॥ अथशतस्थानानि ॥
व्रतमुपैष्यन ॥ १ ॥ तद्यदेवंपिनष्टि ॥ २ ॥ अथाज्यालिप्ताभ्यांपवित्राभ्याम् ॥ ३ ॥
बृहच्छोचायविष्ट्येति ॥ ४ ॥ व्वसूनाᳬरातौस्याम ॥ ५ ॥ अग्निर्वैदेवानामद्धात

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मां ॥६॥ तद्यथायोनौरेतःसिञ्चेत ॥ ७ ॥ तांवैप्राश्नंत्येव ॥ ८ ॥ अथव्वेदपत्नीव्वि
स्रंसयति ॥ ९ ॥ अयंवैयज्ञोयोयंपवते ॥ १० ॥ अथयदस्तमेति ॥ ११ ॥ रेवती
रमध्वमिति ॥१२ ॥ सवाआग्नेयोष्टाकपालःपुरोडाशोभवति ॥ १३ ॥ तद्येसोमेनेजा
नाः ॥ १४ ॥ अथोत्तरेणशालांपरिश्रयन्ति ॥ १५ ॥ अथोल्लिखति ॥ १६ ॥ साया
बभ्रुःपिङ्गाक्षीमासोमक्रयणीस्यात् ॥ १७ ॥ तेदेवाः ॥ १८॥ इन्द्रघोषःप्रोक्षणीरध्व
य्युरादत्ते॥१९॥ साहाकद्रूरुवाच ॥२०॥क्वचित्पुस्तकेचतुर्दशकांडेप्रपाठोक्ताऋषयस्तृ
प्यंतामित्यपिपाठोदृश्यते॥तद्ययतउच्छ्रितादेवाहवैयज्ञन्तन्वानाः॥२१॥अथपार्श्वेन
वासिनावाप्रयौति ॥ २२ ॥ सजुहोतिश्रृणोत्वग्निःसामिधाहवमइति ॥ २३ ॥ इयद्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥६९॥ अथोत्तरतःसिकताउपकीर्णाभवन्ति॥७०॥अथरौहिणोजुहोति॥७१ ॥तेदेवा
अब्रुवन ॥७२॥ तानियदागृह्णाति ॥७३॥ योग्नौतिष्ठन॥७४॥कतमआत्मेति॥७५॥अ
थहैनंमनुष्याऊचुः ॥७६॥ अथायामिच्छेद्गर्भन्दधीतेति॥७७॥इतिसप्तसप्तत्युपानिष
त्स्थानानि॥ क्वचित्पुस्तकेचतुर्दशकांडेषुउपानिषदुक्ताऋषयस्तृप्यंतामित्यपिपाठोद
श्यते॥ अथव्रतंविसृजते॥१॥ सयास्मिन्हर्तावमुंलोकमेति॥२॥ अथनिग्राभ्योग्रहान्वि
गृह्णते॥३॥अथगृहपतिःसुब्रह्मण्यामाह्वयति॥४॥तावाएताः॥५॥तानिदशभवन्ति॥ ६॥
ताऽएताऽअंगुलयः॥७॥मध्यमेवतृतीयाचितिः॥८॥सहोवाच॥९॥अथव्वर्ठशः ॥१०॥
तस्माउहैतदुवाच॥११॥सवाएषआत्मैवयत्सौत्रामणी ॥ १२॥ मर्यादायाएवलोष्टमा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हुत्य॥१३॥प्राश्नीपुत्रादासुरिवासिनः ॥१४॥ इतिअंत्यकंडिका ॥ एवंव्रतंविसृजेत् ॥
॥१॥परमांगतिङ्गच्छतीति ॥ २ ॥ तस्माद्धोतृचमसात् ॥ ३ ॥ तास्मिन्समुषहवामिष्ठा
समिधोभ्यादधाति ॥ ४ ॥ द्वादशवात्रयोदशवादाक्षिणाभवन्ति ॥ ५ ॥ यावानग्निर्याव
त्यःसमात्रातावत्तद्भवति ॥६॥ तस्मात्समानसम्बन्धता ॥ ७ ॥ तस्मादिमेप्राणउप
रिष्टादसञ्छन्नाः ॥८॥ संवादेनैवर्विजोलोकइति ॥ ९ ॥ ब्रह्मणोब्रह्मस्वयम्भुब्रह्मणेन
मः ॥ १० ॥ कैशिनीरेवेमाआप्येतर्हिप्रजाजायंते ॥ ११॥ तस्माद्विमावात्मानमभि
तोबाहू ॥ १२॥तस्मादुहैतज्जीवाश्चपितरश्चनसंदृश्यन्ते ॥ १३ ॥ व्वाजसनेयेनयाज्ञ
वल्क्येनाख्यायन्ते ॥ १४ ॥ इतिअंत्यफक्किका ॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्त्विजम् ॥ होतारंरत्नधातमम् ॥ इषेत्वोर्जेत्वा०पाहि ॥ २ ॥ अग्नआयाहिवीतये
गृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ ३ ॥ शन्नोदेवीरभिष्टयआपोभवन्तुपी
तये ॥ शंयोरभिस्रवन्तुनः ॥४॥ इत्यध्ययनंसमाप्तम् ॥ अंतफक्किकोक्ताऋषयस्तृप्यं
तामितिपाठः ॥ अत्रस्थलेक्वचित्पुस्तके ऋषिविसर्जनं कृत्वा पश्चाच्छ्राद्धं कुर्वंति॥
ततःविरताःस्मइति सकृदुच्चैर्ब्रूयात् ॥ नमस्कारः ॥ ततःतदेतदृचाभ्युक्तंनमृषाश्रांतं
यंजवांतिदेवाइतिनहैनैवंविदुषःकिंचनमृषाश्रांतंभवतितथोहास्यैतत्सर्वेदेवाअवंति ॥
॥१॥ इतिनमस्कारः ॥ अथऋषिश्राद्धमुपक्रम्यते ॥ तत्रायंप्रकारः ॥ कृतप्राणायामो
देशकालौ संकीर्त्य उत्सर्गाङ्गभूतम् ऋषिश्राद्धमहङ्करिष्ये ॥ ॐइदंविष्णुरितिदिग्ब
न्धः ॥ ऋषिश्राद्धोपहाराःशुचयो भवन्त्वित्युपहारप्रोक्षणम् ॥ देशकालपत्रद्रव्यश्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्धसम्पदस्तु ॥ गोतमादिसप्तऋषीणामिदमासनं यथायथाविभागं वःस्वाहाः॥गोत
मादयःसप्तऋषयो यथादत्तं गंधाद्यर्चनं यथाविभागंवःस्वाहा ॥ गन्धादिदानम्॥ऋ
षिश्राध्दसांगतासिद्धयर्थं सप्तसंख्याकान्ब्राह्मणान् यथासंपन्नान्नेन तर्पयिष्ये ॥ तेन
गोतमादयःसप्तऋषयःप्रीयन्तां॥ ऋषिश्राध्दसांगतासिद्धयर्थं हिरण्यनिष्क्रयीभूतां
दक्षिणां मनसोद्दिष्टामाचार्यायसम्प्रददे ॥ आचार्यःकोदादितिकामस्तुतिंपठेत् ॥ ॐ
कोदात्कस्मादात्कामोदात्कामायादात् ॥ कामोदाताकामं÷प्रतिगृहीताकामैतत्ते ॥
॥१ ॥ उपविष्टेषु ब्राह्मणेषूदकादिदानं ॥ तद्यथाॐशिवाआपःसन्तुॐसौमनस्यमस्तु
ॐअक्षतञ्चारिष्टंचास्तु ॥अघोराऋषयःसन्तु ॥ सर्वत्र सन्त्विति विप्राःप्रतिवचनं द
द्युः ॥ उत्सर्गकर्मणोन्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रेभ्यो नानाशर्मभ्यो विप्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्यो भूयसीं दक्षिणां संप्रददे ॥ अद्येत्यादिगुणविशिष्टे काले देशे च छन्दसामुत्सर्गा
ङ्गभूतमृषिश्राद्धं परिपूर्णमस्तु॥अस्तु परिपूर्णमिति विप्राः प्रतिवचनं दद्युः॥ततःसह
नोस्तुसहनोवतु सहनइदंवीर्यवदस्तु ब्रह्म ॥ इन्द्रस्तद्वेदयेनयथानविद्विषामहइति ॥
उभाकवीत्यस्यप्रजापतिर्ऋषिः अश्विनौदेवतेजपेविनियोगः ॥ उभाकवीषुवायोनो
घर्मःपरापतत् ॥ परिसख्यास्यघर्म्मिणोव्विसख्यानिविमृजामहइतिचसर्वेजपेयुः ॥
विरताःस्मेति प्रब्रूयुः ॥ ततऋषीन्विसर्जयेत् ॥तत्र रेणुकारिका॥ततो विसर्जनंकुर्युरु
त्तिष्ठ ब्रह्मणस्पत इति ॥ उत्तिष्ठेति घोरःकण्वऋषिर्बृहतीछन्दः॥ब्रह्मणस्पतिर्देवता॥
सप्तऋषिविसर्जनेविनियोगः ॥ ॐउत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे ॥ उपप्रयन्तुम
रुतः॑ सुदानव॑ इन्द्रप्राशूर्भवासचा ॥१॥ ततःसमाचारात्समुद्रंगच्छेति सप्तर्षीन् जला

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शयेप्लावयेत् ॥ ॐसमुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्गच्छस्वाहा
मित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवीगं
च्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निंवैश्वानरङ्गच्छ
स्वाहामनोमेहार्द्दियच्छदिवन्तेधूमोगच्छतुस्वज्ज्योतिःपृथिवीम्भस्मनापृणस्वाहा
स्वस्वप्रवरान्विसर्जयेत् ॥ अनेनाध्यायोत्सर्गांगत्वेन कृतेन ऋषिपूजनतर्पणादिकर्म
णा श्रीभगवान्वेदपुरुषःप्रीयतां न मम ॥ एवमुत्सर्गं विधाय त्रिरात्रं गुरुगृहे सर्वे
शिष्यानिवसेयुः ॥ तत्र सूत्रं॥ त्रिरात्रꣳसहोष्यविप्रतिष्ठेरन्निति ॥ सूत्रार्थः ॥ ततःसर्वे
गुरुगृहंत्रिरात्रमुषित्वास्वगृहं गच्छेयुः॥अन्यच्च॰त्रिरात्रं नाधीयीरँल्लोमनखानामानि
कृंतनञ्च। सूत्रार्थः॥उत्सर्गोत्तरंत्रिरात्रमध्ययनंनकुर्युः॥ततःनखलोम्नांनिकृन्तनञ्च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकेप्रागुत्सर्गात्॥एवंप्रकारेणेदमुत्सर्गाख्यं कर्म प्रतिवर्षमनुष्ठेयंनित्यत्वात्॥ तथाच कात्यायनः ॥ प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः ॥ क्रियतेछन्दसां तेन पुनराप्यायनं भवेत् ॥ १ ॥ अस्थानोच्छ्वासविच्छेदघोषणाध्यापनादिकं ॥ प्रामादिकं श्रुतं यत्स्याद्यातयामत्वकारितत् ॥ २ ॥ अयातयामैश्छन्दोभिर्यत् कर्म क्रियतेद्विजैः ॥ क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकमिति ॥ ३ ॥ उत्सर्गोत्तरं पुनरुपाकरणं यावच्छुक्लकृष्णव्यवस्थया मन्त्रब्राह्मणयोरध्यनमङ्गानां च ॥ तदुक्तंमिताक्षरायां ॥ यथाशस्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः ॥ विरमेत्पक्षिणी रात्रिं यद्वाप्येकमहर्निशमिति ॥ अत उर्ध्वंतु छन्दांसि शुक्लेषु नियतः पठेत् ॥ वेदांगानि तु सर्वाणि कृष्णपक्षेषुसम्पठेदिति ॥ तत्र शुक्लेषु छन्दांसि कृष्णपक्षेष्वङ्गानीति विवेकः ॥ समूलत्वादयमेवपक्षः श्रेयस्करः ॥ वनस्थोपीदंकुर्वीत ॥ तदुक्तं प्रयोगपारि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाते ॥ उपाकर्मोत्सर्जनञ्च वनस्थानामपीष्यते ॥ धारणाध्यापनांगत्वा द्वहिणांब्रह्म चारिणामिति ॥ उत्सर्गाकरणे दोषः श्रूयते ॥ उत्सर्जनञ्च वेदानामुपाकर्म तथैव च ॥ अकृत्वा वेदजाप्येन फलमाप्नोति मानवः ॥ १ ॥ सूत्रकारिकयोर्भाव्यं विलोक्यपद्धतिःकृता ॥ कर्मठानां प्रबोधाय कान्हदेवद्विजन्मना ॥ २ ॥ खनेत्रवसुभूवर्षे माधवे जान्हवीतिथौ ॥ त्रैव्विद्यमोढसंज्ञेन काशीपुरनिवासिना ॥ ३ ॥ कान्हदेवात्मजेनैषा कृष्णदेवेन धीमता ॥ कान्हदेवकृतिः साध्वी शोधिता विदुषांमुदे ॥ ४ ॥

॥ इतिऋषिपूजनं समाप्तम् ॥

॥श्रीरस्तु॥अथातोऽध्यायोपाकर्म॥अध्ययनमध्यायः॥तस्यौपाकर्मअंगीकारः॥इतिसूत्रशेषः॥एतच्च कृतावसथ्यस्याध्यापनप्रवृत्तस्य भवति॥अपरे तु अध्यापनप्रवृत्तस्य निरग्नेरपिलौकिकाग्नौ भवतीत्याहुः॥अनौपासनिकस्योपाध्यायस्यायमेव विशेषोलौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किकाग्नावीति गर्गपद्धतौ॥हरिहरभाष्येऽपि ॥छन्दोगपरिशिष्टे कात्यायनः॥न स्वेग्ना
वन्यहोमःस्यान्मुक्त्वैकां समिदाहुतिम् ॥ स्वगर्भसंस्क्रियार्थांश्च यावन्नासौ प्रजा
यते ॥ इति ॥ तेनावसथ्याग्नावुपाकर्म भवतीति गम्यते ॥ तेनाध्यापयतोऽपि
निरग्नेः साग्नेरनध्यापयतो नाधिकारः ॥ यत्तु लोके ब्रह्मचारिणं पुरस्कृत्य उपा
कर्म प्रवर्त्तते लौकिकाग्नौ तस्याचारं विहायमूलं दृश्यते ॥ अत्र पूर्वजानां शि
ष्टाचारमङ्गीकृत्यकर्तव्यम् ॥ अस्य लोपो न कर्तव्यः ॥ अथातोऽध्यायोपाकर्म
प्रयोगः॥ पादौ प्रक्षाल्य द्विराचमनम् ॥ आवसथ्याग्नेः पश्चात्पत्न्याशिष्यैः सह प्रा
ङ्मुख उपविश्य आवसथ्येखर्परमधिश्रित्य तत्रयवान् प्रक्षिप्यखर्परस्याधः प्रज्वा
ल्ययवानां भर्जनंतेयवाधानाः ॥ आवसथ्याभावे पृष्टोदिविविधानसिद्धाग्नेः पश्चादि
त्यादि ॥ तदभावेग्राम्याग्निस्थापनम्॥तद्यथा॥ अद्यतिथौ अध्यायोपाकर्मणि पञ्चभू

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारपूर्वकमग्निस्थापनमहं करिष्ये॥ दर्भैःपरिस्तृत्य॥ गोमयोदकेनोपलिप्य॥ स्रुवे
णोल्लिख्य अनामिकाङ्गुष्ठेनोद्धृत्य॥उदकेनाभ्युक्ष्य॥अग्निमुपसमाधाय॥अग्नेःपश्चा
त्पत्न्याशिष्यैः सह प्राङ्मुख उपविश्य अग्नौखर्परमधिश्रित्यतत्र यवान् प्रक्षिप्यखर्प
रस्याधः प्रज्वाल्ययवानां भर्जनं तेयवाधानाः॥भर्जनानंतरं पृथक्करणं होत्रार्थं भक्षणा
र्थंच॥गुरुः प्राणायामत्रयं कालज्ञानञ्च कृत्वा श्रीपरमेश्वरप्रीत्यर्थं अध्यायोपाकर्माहं
करिष्ये॥ वैकल्पिकपदार्थविधारणं कुर्यात्॥तत्र पौर्णमास्यामुपाकर्म॥ पूर्वेण ब्रह्मणो
गमनम्॥ अग्नेरुत्तरतः पात्रासादनम्॥ द्वेपवित्रे ताम्रमयी आज्यस्थाली॥पालाश्यः
समिधः ॥ प्राञ्चावाघारौ॥ समिद्धतमे आज्यभागौ॥ तिलहोमः सावित्रीमंत्रेण॥पूर्ण
पात्रदक्षिणा॥त्रिरात्रं लोमनखानामनिकृन्तनम् ॥एतान् वैकल्पिकपदार्थानहं करि
ष्ये ॥ ऋषिच्छंदोदेवतास्मरणम् ॥ इषेत्वेत्यादिकस्य खंब्रह्मान्तस्य माध्यंदिनीयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वान्ऋषिः वायुर्देवता गायत्र्यादीनिसर्वाणि छंदांसि यजुरादीनि च अध्यायोपाकर्मणि विनियोगः ॥ अथ देवताभिध्यानम् ॥ तत्र ॥ प्रजापतिं॥इन्द्रम्॥अग्निम्॥सोमं ॥ पृथिवीं ॥ अग्निं ॥ ब्रह्माणं ॥ छन्दाᳬसि ॥ अन्तरिक्षं॥वायुं ॥ब्रह्माणं॥छन्दाᳬसि ॥ दिवं ॥ सूर्यं ॥ ब्रह्माणं ॥ छन्दाᳬसि ॥ दिशः॥चन्द्रमसं॥ब्रह्माणं॥छन्दाᳬसि॥प्रजापतिं ॥ देवान् ॥ ऋषीन् ॥ श्रध्दां ॥ मेधां ॥ सदसस्पतिं ॥ अनुमतिं ॥ एताःप्रधानदेवताआज्येन ॥ सदसस्पतिं धानाभिः सवितारंसपर्णसमिधा॥ व्यवहित्या च पुनः पुनः ॥ सवितारंतिलैः ॥ अग्निं स्विष्टकृतंधानाशेषेण ॥ अग्निं ॥ वायुं ॥ सूर्यं ॥ अग्निवरुणौ ॥ अग्नीवरुणौ ॥ अग्निं॥वरुणं॥सवितारं ॥विष्णुं॥विश्वान्देवान् ॥ मरुतःस्वर्क्कान् ॥ वरुणं ॥ प्रजापतिं ॥ एता अंगप्रधानार्था देवताः अस्मिन् कर्मण्यहं यक्ष्ये॥ दक्षिणतो ब्रह्मासनमास्तीर्य॥ देवदत्तशर्मन् अ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मिन् कर्माणि त्वं ब्रह्मा भव ॥ भवामीति प्रतिवचनं इतिब्रह्मवरणं॥ब्रह्मातूष्णीं आस
नावलोकनं ॥ आसनान्तृणानिरसनञ्च कृत्वा उपविशेत् ॥ अग्नेरुत्तरतःप्रणीतार्थमास
नद्वयं निधाय प्रणीताचमसं वामहस्ते कृत्वा आत्माभिमुखं जलेनापूर्य प्रथमासने
निधाय चमसदण्डमालभ्य ब्रम्हाणमवलोक्य तेन संकेतादिनाऽनुज्ञातः ॥ प्रणीय ॥
उत्तरासनेनिदध्यात् तत उदगगैः प्रागग्रैः कुशैरग्निं परिस्तीर्य ॥ अर्थवदासाद्य॥अ
ग्नेरुत्तरतःप्राक्संस्थमुदकसंस्थं वा पात्रासादनम्॥पवित्रच्छेदनदर्भास्त्रयः॥पवित्रेद्वे॥
प्रोक्षणीपात्रं॥आज्यस्थाली॥संमार्गकुशास्त्रिप्रभृतयः॥उपयमनकुशाःसप्तप्रभृतयः ॥
समिधस्त्रिप्रभृतयः ॥ स्रुवः ॥ आज्यं ॥ धानाः॥पूर्णपात्रञ्च ॥ अथोपकल्पनीयानि ॥
प्रतिशिष्यं नव नव समिध आर्द्राः सपत्राअवदुंबरस्य॥दधिभक्षार्थं॥लौकिकाधानाः
बाहुमात्रमौदुंबरकाष्ठन्तिलस्थापनस्थाने सर्पफणाकारमाकर्षफलकं ॥ तिलाश्चेति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवित्रकरणं॥द्वयोरुपरि त्रीणिनिधाय द्विमूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वान्युगप
द्धृत्वा अनामिकांगुष्ठाभ्यां च्छित्त्वा तानुत्तरतःक्षिपेत् ॥ प्रोक्षणीपात्रं प्रणीतोत्तरतो
निधाय॥ प्रोक्षणीपात्रेपात्रांतरेण प्रणीताद्भिस्तासां प्रोक्षणम्॥सपवित्रहस्तेनोत्तानेन
पात्रप्रोक्षणं ॥ आज्यस्थाल्याःप्रोक्षणं ॥ संमार्गकुशानां प्रोक्षणं ॥ उपयमनकुशानां
प्रोक्षणं ॥ समिधां प्रोक्षणं॥स्रुवस्यप्रोक्षणं आज्यस्य प्रोक्षणं ॥ धानानां प्रोक्षणं॥पूर्णपा
त्रस्य प्रोक्षणं ॥ प्रणीताग्न्योर्मध्येऽसञ्चरे प्रोक्षणीर्निधाय ॥ कुशोपगृहेण आज्यस्था
ल्यामाज्यनिर्वापः॥ आज्याधिश्रयणं॥ततो ज्वलदुल्मुकेन पर्याग्निकरणं॥ इतरथावृ
त्तिः॥उदकंस्पृशेत्॥अर्धश्रितेस्रुवंप्रतप्य ॥ संमार्गकुशैःसमृज्य ॥ अग्रैर्मूलादारभ्या
ग्रपर्यन्तं॥ मूलैरग्रादारभ्य मूलपर्यन्तं समृज्य॥प्रणीतोदकेनाभ्युक्ष्य॥पुनः प्रतप्य॥
अमृत्केबर्हिरादीनि दक्षिणतो निदध्यात॥ आज्यमुद्वास्य ॥ उत्तरतोनिधाय ॥ त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तोग्नेः पश्चिमतो निदध्यात् ॥ पवित्राभ्यामाज्यमुत्पूय ॥ प्रोक्षणाश्च पूर्ववदुत्पूय॥आ
ज्यमवेक्ष्य॥अपद्रव्यनिरसनं॥उपयमनान् कुशानादाय ॥ तिष्ठन् सामिधोभ्याधाय
प्रोक्षण्युदकशेषेण सपवित्रेण हस्तेनेशानमारभ्येशानपर्यन्तं प्रदक्षिणमाग्निं पर्युक्ष्य ॥
इतरथावृत्तिः॥पवित्रयोःप्रणीतासु निधानं॥सोपग्रहं सव्यहस्तमुत्तानं हृदि निधाय
दक्षिणजानुनिपातः ॥ ब्रम्हणोन्वारम्भः दक्षिणहस्तेनस्रुवेण होमः ॥ मनसाॐप्रजा
पतये स्वाहा॥इदं प्रजापतये न मम ॥ त्यागान्ते द्रव्यप्रक्षेपः॥प्रोक्षणीपात्रे संस्रवधा
रणं॥ ॐइन्द्रायस्वाहा ॥इदं०॥ ॐअग्नयेस्वाहा ॥इदं०॥ ॐसोमायस्वाहा ॥इदं०॥
न ब्रह्मान्वारंभः॥ऋग्वेदे॥ॐपृथिव्यैस्वाहा॥इदंपृ०॥ ॐअग्नयेस्वाहा ॥ इदं० ॥ ॐ
ब्रह्मणेस्वाहा॥इदं०॥ॐछन्दोभ्यःस्वाहा॥ इदं० ॥ यजुर्वेदे ॥ ॐअन्तरिक्षायस्वाहा ॥
इदं०॥वायवेस्वाहा ॥इदं०॥ॐब्रह्मणेस्वाहा ॥ इदं० ॥ ॐछन्दोभ्यःस्वाहा ॥ इदं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामवेदे॥ॐदिवेभ्वाहा ॥ इदं० ॥ ॐसूर्याय० ॥इदं० ॥ ॐब्रह्मणे० ॥ इदं० ॥ ॐछन्दोभ्यः॥इदं०॥ अथर्ववेदे ॥ ॐदिग्भ्यः० ॥ इदं० ॥ ॐचन्द्रमसे० ॥ इदं० ॥ ॐब्रह्मणे०॥ इदं०॥ ॐछन्दोभ्यः०॥इदं०॥ ॐप्रजापतये०॥इदं०॥ॐदेवेभ्यः०॥इदं० ॥ ॐऋषिभ्यः०॥इदं०॥ॐश्रध्दायै०॥इदं०॥ ॐमेधायै०॥ इदं०॥ ॐसदसस्पतये० ॥ इदं०॥ॐअनुमतये०॥ इदं०॥ एताः सप्तविंशत्याहुतय आज्येन ॥ ततःप्रोक्षितधानाभिघारणं ॥स्रुवेण धाना अवदाय॥ॐसदसस्पतिमद्भुतमित्यनेन मन्त्रेण जुहुयात्॥ ॐसदसस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यम् ॥ सनिंमेधामयासिषꣳस्वाहा ॥ इदं सदसस्पतये०॥सदसस्पत्येवाइमं मन्त्रं गुरुणापठ्यमानं शिष्या अपि सहानुपठेयुः॥तत उदुंबरसमित्त्रितयमभिघार्यहस्ते गृहीत्वा उत्थाय प्राङ्मुखास्तिष्ठन्तः ॥तत्सवितु०स्वाहा ॥ इदमग्नये नमम ॥अग्निःसविता यद्वा सवित्रे इत्युच्चार्य एकांसामिधमादध्युः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं मन्त्रेण द्वितियांतथा तृतीयां ॥ ततःसर्वे उपविशेयुः ॥ आचार्यःपुनःस्रुवेणधाना
अवदाय॥द्वितीयां धानाहुतिं पूर्ववत्॥इदं०॥ततस्तिस्रोऽपराःसमिधोघृतेनाभ्यज्य ॥
उत्थायप्रांमुखास्तिष्ठन्तः॥ तत्सवितु०स्वाहा ॥ इत्युच्चार्य एकां समिधमभ्यादध्युः ॥
एवंद्वितीयां तथा तृतीयां॥पुनराचार्यो धानाहुतिं जुहुयात्॥इदंसदस० मन्त्रानुप
ठनं शिष्याणामपि ॥ समित्त्रयं पूर्ववज्जुहुयात् ॥ ब्रह्मचारीतु शिष्योऽहरहरग्निका
र्यक्रमेण समिदाधानंकुर्यात् ॥न सावित्र्या॥नवंचेत्पूर्वं तत्पित्रा नांदीश्राद्धांतं कर्त्तव्यं
॥ अन्यत्सर्वं समानं ॥ ततो या उपकल्पिता धानाःकिंचिल्लौकिकरीत्या प्रोक्ष्य दधि
च प्रोक्ष्य॥तिस्रस्तिस्रो गृहीत्वा॥ॐशन्नोभवत्विति मन्त्रेण दन्तैरखादन्तः॥शन्नोभ
वन्तुव्वाजिनोहवेषुदेवतातामितद्रवःस्वर्काँ ॥ जम्भयंतोहिवृकꣳरक्षांꣳसिसनेम्यस्म
द्युयवन्नमीवाः ॥ प्राश्नीयुः॥द्विराचमनं॥ॐदधिक्राव्णो०॥इति मन्त्रेण दधिभक्षेयुः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विराचमनं ॥ तत आचार्यो यावन्तं शिष्यगणं आत्मन इच्छेत्तावतस्तिलान् गण
यित्वा आकर्षफलकेनावदायशुक्रज्योतिरित्यनुवाकेन सावित्र्या वा जुहुयात्॥ ॐ
तत्सवितुर्वरेण्यं० दयात् स्वाहा ॥ इदं सावित्रे० ॥ अथ ब्रह्मान्वारंभः॥संस्रवप्रक्षेपः॥
ततोधानाभ्यः स्विष्टकृत् ॥ ॐअग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते॥ भूराद्या
नवाहुतीः आज्येन जुहुयात्॥सर्वत्र त्यागांते द्रव्यप्रक्षेपः॥संस्रवप्राशनं आचमनं ॥
पवित्राभ्यां मार्जनं॥अग्रौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानं ॥ तद्यथा ॥ ब्रह्मन्
अस्योपाकर्मणोगतया विहितं पूर्णपात्रं प्रतिगृह्यतां॥ॐद्यौस्त्वाददात्विति मन्त्रस्य
ब्रह्मणो जपः ॥ प्रणीताविमोकःततोऽग्निमुत्तरेण कुशेषु प्रत्यङ्मुखोपविष्टेभ्यः शिष्ये
भ्यः प्राङ्मुख आचार्यः ॥ ॐकारमुक्त्वा त्रिश्चसावित्रीमनुब्रूयात् ॥ यथा ॐतत्सवितु०
दयात् ॥इषेत्वादि ईशावास्यमन्तं॥व्रतमुपैष्यन्नित्यादिसर्वमन्त्रब्राम्हणयोरध्याया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीन्प्रब्रूयात् ॥ बह्वृचां ऋषिमुखानि॥पर्वाणि छन्दोगानां ॥ सूक्तान्यथर्वणानां॥ एवं सर्वंपठित्वा॥ गुरुःशिष्याःश्चजपन्ति ॥ ॐसहनोस्तुसहनोवतुसहनऽइदंवीर्यवदस्तु ब्रम्ह॥इन्द्रस्तद्वेदयेनयथानविद्विषामहे॥ इतिमन्त्रंजपित्वा ॥ त्रिरात्रमनध्ययनंलो मनखानामनिकृन्तनमवपनञ्चकरिष्यामहे ॥इतिसर्वेषांसङ्कल्पः ॥ प्रागुत्सर्गाद्वा नि यमोलोमनखनिकृन्तनवर्जने ॥ उत्सर्गावधि लोमनखानामकृन्तनमहंकरिष्ये ॥ इ तिछन्दसामुत्सर्गात्प्राङ्मन्त्रब्राम्हणयोरध्ययनम् ॥ इतिश्रीमद्यज्ञविशारदगङ्गाधरभ ट्टानुसारेणहरिहराद्यनुसारेणविरचिताध्यायोत्सर्गोपाकर्मप्रयोगःसमाप्तः ॥

॥ श्रीगणेशायनमः ॥ अथहेमाद्रीप्रयोगः ॥ सुमुखश्चैकदंतश्च कपिलो गजकर्ण कः ॥ लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥१॥धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः॥द्वादशैतानि नामानि यःपठेच्छृणुयादपि॥२॥विद्यारंभे विवाहेच प्रवेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्गमे तथा॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥३॥ शुक्लांबरधरं देवं शशिव
र्णंचतुर्भुजं॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥४॥ अभीप्सितार्थसिद्ध्यर्थं पू
जितोयःसुरासुरैः॥सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ वक्रतुण्डमहाकाय
सूर्यकोटिसमप्रभ॥अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥६॥ वागीशाद्याःसुमनसः
सर्वार्थानामुपक्रमे ॥ यन्नत्या कृतकृत्याः स्युस्तं नमामि गजाननं ॥७॥ गणनाथं न
मस्कृत्य नमस्कृत्य पितामहं ॥ विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वती॥८॥
स्थानक्षेत्रं नमस्कृत्य दिननाथं निशाकरं॥धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं॥९॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनेश्चरं॥ राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः॥
॥१०॥शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान्॥गर्गमुनिं नमस्कृत्य नारदं पर्वतं
तथा॥११॥वसिष्ठं मुनिशार्दूलं विश्वामित्रंच गोभिलं ॥ अगस्त्यंच ॥ पुलस्त्यंच द

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षमित्रं पराशरं ॥भरद्वाजं च माण्डव्यं याज्ञवल्क्यंचगालवं ॥ १२ ॥ अन्येविप्रास्त
पोयुक्ता वेदशास्त्रविचक्षणाः ॥ १३ ॥ तान् सर्वान् प्रणिपत्याहं शुभङ्कर्म्म समारभे ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः॥येषामिन्दीवरश्यामो हृदयस्थो जनार्द
नः॥१४॥अग्रतःश्रीनृसिंहश्च पृष्ठतो देवकीसुतः ॥ रक्षतां पार्श्वयोर्देवौ भ्रातरौ राम
लक्ष्मणौ ॥१५ ॥ॐस्वस्ति श्रीमुकुन्दसच्चिदानंदस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिवि
जृम्भितावियोगात्कालकर्म्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारतृतीयोद्भूतवेदादिप
ञ्चकेन्द्रियदेवतानिर्मितंडकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः
श्रीनारायणस्य नाभिकमलोद्भूतसर्वलोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणा
य प्रजापतिप्रार्थितस्यसमस्तजगदुत्पत्तिस्थितिलयकारणस्य रक्षाशिक्षाविचक्षण
स्यप्रणतपारिजातस्य अच्युतानंतवीर्यस्य श्रीमद्भगवतो महापुरुषस्य श्रीमदादिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रायणस्य अचिंत्यापरिमितशक्त्याध्येयमानस्य महाजन्मौघमध्ये परिभ्रममाणानां
मनेककोटिब्रह्मांनामेकतमे ऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्याकरणैरा
वृतेआस्मिन्महति ब्रह्मांडखण्डयोमध्ये आधारशक्ति श्रीमदादिवाराहदंष्ट्राग्रविराजि
ते कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशंखाद्यष्टमहानागैः संध्रिय
माणे ऐरावतपुण्डरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकाष्टदिग्गजोपरि प्र
तिष्ठितस्य अतलवितलसुतलतलातलरसातलमहातलपाताललोकस्योपरि भागे भु
र्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोक सत्यलोकादिसप्तलोकस्याधोभागे
चक्रवालशैलमहावलयनगमध्यवर्तिनो महाकालमहाफणीराजशेषस्य सहस्रफणानां
मणिमंडलमण्डिते दिग्दन्तिशुण्डोत्तंभिते अमरावतीभोगावतीसिद्धवतीगान्धर्ववतीकांच्यवन्त्यलकावतीयशोवतीतिपुण्यपुरीप्रतिष्ठिते इन्द्राग्नियमनिर्ऋतिवरुणवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युकुबेरेशानेतिदिक्पालप्रतिष्ठिते लोकालोकाचलवलयिते लवणेक्षुसुरासर्पिर्दधिक्षारो
दकेतिसप्तार्णवपरिवृते जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्विपयुते इ
न्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेतिनवखंडमण्डिते सुवर्णगिरी
कर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णभूमण्डलेअयोध्यामथुरा
मायाकाशीकाच्यवन्तिकाद्वारावतीतिसप्तपुरीप्रतिष्ठितेशालग्रामशम्भलनन्दिग्रामे
तिग्रामत्रयविराजितेचम्पकारण्यबदरीकारण्यदण्डकारण्यार्बुदारण्यधर्मारण्यपद्मार
ण्यगृह्यारण्यजम्बुकारण्यादीनां मध्ये नैमिषारण्ये सुमेरुनिषदरजतकूटशुभ्रकू
टश्रीकूटहिमाचलानां हरिवर्षकिंपुरुषवर्षयोश्च दक्षिणेनवसहस्रयोजनविस्तीर्णे भर
तखण्डे मलयाचलसह्याचलविंध्याचलानामुत्तरेण स्वर्णप्रस्थचण्डप्रस्थशुक्तिकावर्त
करमणकमहारमणकपाञ्चजन्यसिंहललंकेति नवखण्डोपद्वीपमण्डिते दक्षिणावस्थि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरेणुकाद्वयसूकरकाशीकाञ्चीकालिकालवटेश्वरकालञ्जरमहाकालेति नवोखरयु
तेद्वादशज्योतिर्लिङ्गगङ्गायमुनासरस्वतीनर्मदातापीपयोष्णीकावेरीत्यादिपुण्यनदी
विलसितेहिमवन्मेरुगोवर्द्धनक्रौञ्चश्रीशैलकचित्रकूटमहेमकूटमहेन्द्रमलयसह्यविंध्य
पारियात्राद्यनेकपर्वतसमन्विते मतङ्गमाल्यवात्कष्किन्धऋष्यशृङ्गेतिपञ्चमहानग
रयुते कोकन्ताहिरण्यशृङ्गकुब्जार्बुदमणिकार्णिवटशालग्रामसूकरमथुरागयानिष्क्रम
णलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्याविलसिते जंबुद्वीपेकर्मभूमौस्वा
म्यवर्तिस्वर्गस्थितामराद्यासितावतारे गङ्गादिसरिद्भिः पाविते भारतेवर्षेनिखिलजन
पावनपरमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गतब्रह्मावर्तै
कदेशे जनपदे कुरुक्षेत्रादिमध्यरेखायाः अमुकदिग्भागेगङ्गायाः अमुकतटे अमुक
क्षेत्रान्तरवर्तिसोमसूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसकलजग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धे पञ्चाशदधिकेवर्षे प्रथममासे प्रथमप
क्षे प्रथमदिवसे अन्होद्वितीये यामे तृतीयं मुहूर्तेरथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अ
ष्टमे श्वेतवराहकल्पे स्वायंभुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वंतरे सद्युगा
दिचतुर्युगानां मध्ये अष्टाविंशतिमे कलियुगे तत्प्रथमविभागे संवत्सराणांव्यतिक्रां
तानां धनुःसाहस्र्यांसप्तत्यधिकायांतदुपरिवर्तमाने श्रीमन्नृपविक्रमार्कसमयातीतसं
वदेकोनाविंशशताधिकयथासंख्यागमे चान्द्रसावनसौरनक्षत्रादिभ्रमितप्रभवादिष
ष्टिसंवत्सराणांअमुकनाम्नि संवत्सरे उत्तरगोलावलंबिनि श्रीमार्तण्डमण्डले अमुक
ऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अ
मुककरणे अमुकचन्द्रे अमुकदेवगुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु सत्सु एवं ग्रह
गुणविशिष्टे देशे काले मम इह जन्मनि जन्मांतरे वा सञ्चितानां पापानां ब्रह्महननसु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रापानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपूर्वकाणां मनोवा
क्कायकृतानां बहुकालाभ्यस्तानां उपपातकानांच स्पृष्टास्पृष्टसंकलीकरणमलिनीक
रणापात्रीकरणजातिभ्रंशकरणरसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रवि
क्रयदास्यजादिपशुविक्रयव्रात्यब्राह्मणदुष्टब्राह्मणत्वनिरर्थकवृक्षच्छेदनऋणानपाक
रणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणब्राह्मणनिन्दागुरुनिंदावेदनिन्दाशास्त्र
निंदाऽभक्ष्यभक्षणाऽभोज्यभोजनाचोष्यचोषणालेह्यलेहनास्पृश्यस्पर्शनाश्राव्यश्र
वणाहिंस्यहिंसनावंद्यवंदनाचिन्त्यचिन्तनायाज्ययाजनापूज्यपूजनपूज्यपूजाव्य
तिक्रमणमातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनवैश्यस्त्रीगमनक्षत्रियस्त्री
गमनब्राह्मणस्त्रीगमनविधवागमनदासीगमनवेश्यागमनचाण्डालादिहीनजातिगम
नपशुयोनिबीजपातकूटसाक्षित्वपैशून्यवादमिथ्यापवादम्लेच्छसंभाषणब्रह्मद्वेषक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणस्वामिभेदनमित्रवंचनभार्यावंचनगर्भपातनरजस्वलागमनसकामस्त्रीस्तिनस्पर्श
नपथिताम्बूलचर्वणहीनजातिसेवनानृतभाषणपरान्नभोजनासाक्षिभोजनगणान्नभो
जनभ्रूणहिंसापशुहिंसास्त्रीहिंसास्नानत्यागसंध्यात्यागपूजात्यागौपासनाग्नित्यागवै
श्वदेवत्यागात्मार्थपाककरणैकाकिमिष्टान्नभोजनबालकैःसहभोजनक्रमुकपात्रभोज
नपंक्तिभेदकरणात्मस्त्रीसहभोजनप्रकीर्णपातकानांएतत्क्षणपर्यन्तसञ्चितानांलघु
स्थूलसूक्ष्माणाञ्चनिरासार्थं सहस्रगोदानजन्यकुरुक्षेत्रादिसर्वतीर्थस्नानजन्यफल
प्राप्त्यर्थं समस्तपितॄणां आत्मनश्चविष्णवादिलोकप्राप्तये वा अधीतानामध्येष्यमा
णानामध्यायानांस्थापनक्रोशघोषदुर्वृत्तद्रुतमुच्चारितवर्णानां पूर्वसवर्णानामलोपल
म्बितद्रुतमुच्चारितवर्णानां स्पृष्टवर्णविघट्टनादिभिःप्रामादिकश्रुतीनां यज्जातं यातया
मत्वं तत्परिहारार्थंअक्षरहीनंमात्रास्वरहीनं अङ्कहीनमनुस्वारपदच्छेदकाण्डिकाव्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनाविकरीषस्वरभाक्तिद्विर्भावह्रस्वदीर्घप्लुतौरसकंठ्यतालुमूर्द्धन्यौष्ठनासिकानुनासि
कांचिह्नामूलीयोदात्तानुदात्तस्वरितलक्षणजातिवर्णगोत्रप्रयत्नोच्चारणमाधुर्याक्षरव्य
क्तिहीनंवेदाध्ययनंतज्जानितपातकनिरासार्थञ्च सर्वेषामाप्यायनार्थं बीजत्वार्थञ्च न
वोपनीतानां ग्रहणाधिकारार्थंइतरेषामुत्सृष्टानां वेदानां पुनर्ग्रहणार्थंच यातयामत्व
दोषपरिहारार्थंयथावद्यद्देवतोपासनया यथायथावत्फलप्राप्त्यर्थं देवब्राह्मणसवितृ
सूर्यनारायणसन्निधौ गङ्गाभागीरथ्यां प्रवाहाभिमुखेनाभिमात्रजले गणस्नानमहं
करिष्ये ॥ छ ॥ ॥ इति हेमाद्युक्तमहासंकल्पः समाप्तः ॥ ॥ छ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाहिरात.

नाम.	की.	रु. आ.	ट. म.	रु. आ.
२७६ नवग्रहविधानपद्धति	क	०–५	०–१	
२७७ नवग्रहकाण्डी [नित्यपूजाविधानपद्धति]	क	०–२	०–॥	
२७८ नान्दीश्राद्ध	क	०–२	०–॥	
२७९ नित्यकर्मपद्धति	क	०–३	०–॥	
२८० नारायणबलि	क	०–४	०–॥	
२८१ नित्यतंत्र भाषाटीका	श्री	०–१२	०–१	
२८२ नित्यकर्मप्रयोगमाला नित्यनियमके ६२ विषय	श्री	०–६	०–१	
२८३ आह्निकसूत्रावली	ज	१–८	०–२	
२८४ पञ्चयज्ञ संस्कृत टीकासहित	(१)	०–६	०–१	
२८५ पञ्चयज्ञ भाषाटीका	क	०–४	०–॥	
२८६ पञ्चकशान्ति	क	०–२	०–॥	
२८७ पार्वणश्राद्ध प्रयोग मूल संस्कृत	क	०–२	०–॥	

नाम.	की.	रु. आ.	ट. म.	रु. आ.
२८८ पार्वणश्राद्ध पद्धति भाषाटीका	क	०–४	०–॥	
२८९ प्रतिष्ठामयूख	क	०–६	०–१	
२९० बृहत्कर्मकांडसमुच्चयमरणकालसेवार्षिकश्राद्धश्री		०–६	०–१	
२९१ मंत्रमुक्तावली (मंत्रसंग्रहः) वैष्णव शिव शाक्त सर्वोपयोगी	डा	०–३	०–॥	
२९२ प्रेतमञ्जरी भाषाटीका बडी	क	०–१०	०–२	
२९३ यज्ञोपवीतपद्धति मूल	क	०–२	०–॥	
२९४ यज्ञोपवीत भा० टी०	क	०–५	०–॥	
२९५ रुद्रविधानपद्धति	क	०–५	०–१	
२९६ लम्बोदरीहवनपद्धति....	क	०–४	०–॥	
२९७ वरदगणेशपूजा	क	०–१॥	०–॥	
२९८ वासिष्ठीहवनपद्धति	क	०–४	०–॥	

पुस्तकें मिलनेका ठिकाना—गंगाविष्णु श्रीकृष्णदास, 'लक्ष्मीवेंकटेश्वर' छापाखाना, कल्याण—मुंबई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* इति श्रावणीप्रयोगः समाप्तः । *

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार 228
१८०

पुस्तक लौटाने की तिथि अन्त में अङ्कित है । इस तिथि को पुस्तक न लौटाने पर दस नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड आप को लगाया जायेगा ।

५०००.११.१४ ।

Entered in Database

Signature with Date

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय, गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar